A.C. Joshi Library
P.U. Chandigarh

MSS No. 730 Subject Gadya Kavya

Name of MSS Meghdoot

Author Kalidasa

Period ______ Folios 122

Script Devnagiri Source Prof. M. Rakesh, D.A.V. college, Jalandhar

Missing Folios ______

मेघदूत

कालीदास

ह.ग्रं. ७३०





730

मे॰टी॰
१

ॐ श्रीगणेशाय नमः मातृपितृभ्यां जगतो नमो वामार्धजानये सद्योदक्षिणदृक्पातसंकुचद्वामदृष्टये १ अंतरायति-
मिरोपशांतये शांतपावनमचिंत्यवैभवं तं नरं वपुषि कुंजरं मुखे मन्महे किमपि तुंदिलं महः २ शरणं करवाणि शर्मदं
ते चरणं वाणि चराचरोपजीव्यं करुणामसृणैः कटाक्षपातैः कुरु मामंब कृतार्थसार्थवाहं ३ इहान्वयमुखेनैव स-
र्वं व्याख्यायते मया नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ४ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति
शास्त्रात्काव्यादौ वस्तुनिर्देशं कुर्वन्कथां प्रस्तौति ५ कश्चिदिति स्वाधिकारात्स्वनियोगात्प्रमत्तोऽनवहितः प्रमादोऽन

कश्चित्कांताविरहगुरुणा स्वाधिकारप्रमत्तः शापेना
स्तंगमितमहिमा वर्षभोग्येन भर्तुः ॥

वधानतेत्यमरः जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वात्पंचमी अतएवापरथा हेतोः कांतावि-
रहेण गुरुणा दुर्भरेण दुःसहेनेत्यर्थः गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे इति शाश्वतः वर्षं संवत्सरेण ।
भोग्येन कालाध्वनोरत्यंतसंयोगे द्वितीया अत्यंतसंयोगे च इति समासः कृमति चेति णत्वं भर्तुः स्वामिनः शापेन अस्तं
नाशं गमितो महिमा सामर्थ्यं यस्य सोऽस्तंगमितमहिमा अस्तमिति मकारान्तमव्ययं तस्य द्वितीयेति योगविभा- १
गात्समासः कश्चिद्यक्षो देवयोनिविशेषः ॥

विद्याधराप्सरोयक्षरक्षोगंधर्वकिन्नराः पिशाचोगुह्यकःसिद्धोभूतोमीदेवयोनयइत्यमरः जनकतनयावगाहनैः। 2
पुण्यानिधर्मविवर्धनानिउदकानियेषुपावनेष्वित्यर्थः छायाप्रधानास्तरवः छायास्तरवः शाकपार्थिवादित्वात्समासः।
स्निग्धाःसांद्राश्छायातरवोनमेरुद्रुतायेषुतेषुवसतियोग्येष्वित्यर्थः स्निग्धत्वमस्त्राणोसांद्रच्छायाद्रुतोनमेरुस्या
दितिचशब्दार्णवेरामगिरेश्चित्रकूटस्याश्रमेषुवसतिःस्थितिर्वहिवसर्तिभ्यश्चेत्यौणादिकोतिप्रत्ययः चक्रेकृत

यत्सश्चक्रेजनकतनयास्नानपुण्यो
दकेषु स्निग्धच्छायातरुषुवसतिं
रामगिर्याश्रमेषु १ ॥

वान् अत्रकाव्येनचतुर्नगरार्णवादिवर्णनसंभवान्महाकाव्यत्वंरसोविप्रलंभशृंगारः अत्राप्युन्मादावस्थाय
नएवयक्षानवस्थानेसूचितमाश्रमेष्वितिबहुवचनेनसीतांप्रतिरामस्यदुःखमस्मिन्देशेमनस्विनियायमेघसंसे
देशोकविःकृतवानित्याशापेनाङ्कः अत्रकाव्येसर्वत्रमंदाक्रांतावृत्तंतल्लक्षणंमंदाक्रांताजलधिषडगैर्म्भौनतौता

मेघटी २

तस्मिन्निति तस्मिन्नद्रौ चित्रकूटाद्रौ अबलाविप्रयुक्तः कांताविरही कनकस्य वलयः कटकः कटको वलयोऽस्त्रि
यामित्यमरः तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्पराद्धः प्रदेशो यस्य स तथोक्तः कातंत्रे प्रकोष्ठः स्या
त्प्रकोष्ठः कूर्पराद्धः इति हारावली विरहदुःखात्कृशत्वमित्यर्थः कामी कामुकः स यक्षः कतिचिन्मासानष्टौ मासानि
त्यर्थः मासानत्यानगमयच्चतुर इति वक्ष्यमाणवचनान्नीत्वा यापयित्वा आषाढाभिर्नक्षत्रेण युक्ता पौर्णमा
सी आषाढी नक्षत्रेण युक्तः काल इत्यण्प्रत्ययः टिड्ढाणञित्यादिना ङीप् सास्मिन्पौर्णमासीत्याषाढे सेमा

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नी
त्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ॥

सः सास्मिन्पौर्णमासीति तस्यामित्यण् तस्य प्रथमदिवसे आश्लिष्टसानुमाक्रांतकटकं वप्रक्रीडा उत्खात
केलयः उत्खातकेलिः शृंगाद्यैर्वप्रक्रीडा निगद्यत इति शब्दार्णवे तासु परिणतस्तिर्यक्दंतप्रहारः तिर्यग्दंत
प्रहारस्तु गजः परिणतो मत इति हलायुधः स चासौ गजश्च तस्य इव प्रेक्षणीयो दर्शनीयस्तं मेघं ददर्श गजप्रेक्ष
णीयमित्यत्रैव शब्दालोपात् लुप्तोपमा केचिदाषाढस्य प्रथमदिवस इत्यत्र प्रत्यासन्ने नभसीति वक्ष्यमाणत। २
भोमास प्रत्यासत्त्यर्थं प्रत्यासन्ने प्रथमदिवस इति पाठं कल्पयंति तदसंगतं प्रथमातिरेके कारणाभावा

ततभोमासस्यप्रत्यासत्त्यर्थमित्युक्तमितिचेन्नप्रत्यासत्तिमात्रस्यमासप्रत्यासत्त्यैवप्रथमदिवसस्याप्युपपत्तेश्चत्वेनप्र
त्यासत्तेरुपयोगित्वाभावेनाविवक्षितत्वात् विवक्षितत्वेवास्वपक्षेपिप्रथमदिवसान्तिकत्वेनमेघदर्शनकल्पनाया
प्रमाणाऽभावेनतदसंभवात् प्रत्युतस्वपक्षावकुशलसंदेशस्यभाव्यनर्थप्रतीकारार्थस्यप्रस्तुतत्वानुमानमुक्तं।
भवतीत्युपयोगस्थितिः ननून्मत्तस्यनायंविवेकइतिचेन्नउन्मत्तस्यनानानर्थप्रतीकारार्थप्रवृत्तिरपीतिसंदे।

आषाढस्यप्रथमदिवसेमेघमाश्लिष्टसानुं व
प्रक्रीडापरिणतगजप्रेक्षणीयंददर्श २ ॥

शापवशाभूत्तत्तयाचकामारंभस्यवाप्रसिद्धःस्यात् इत्यदोमूलच्छेदीपांडित्यप्रकर्षःकथंतर्हिशापांतोमेभुजग
शयनादुत्थितेशार्ङ्गपाणावित्यादिनाभगवत्प्रबोधावधिकस्यशापस्यमासचतुष्टयावशिष्टत्वोक्तेः दशदिवसा
धिक्यइतिचेत्स्वपक्षेपिकथमसौविंशतिदिवसैर्न्यूनत्वादितिसंतोष्टव्यंतस्माद्दोषद्वेवसमविपद्यन्तमितिसूक्ष्
क्तंप्रथमदिवसइति २ ॥

मे॰टी॰ ३ तस्येति राज्ञानेयत्वाः राजाप्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोरिति विश्वः राज्ञां राजा राजराजः कुबेरः राजराजोधनाधि
पइत्यमरः राजाहःसखिभ्यष्टजितिटच्प्रत्ययः तस्यानुचरोयक्षः अंतर्बाष्पः धीरोदात्तत्वादंतस्तंभिताश्रुः सन् कौ
तुकाधानहेतोरभिलाषोत्पत्तिकारणस्य कौतुकंचाभिलाषेस्यादुत्सवेनर्महर्षयोरिति विश्वः तस्यमेघस्यपुरोऽ
ग्रेकथमपिगरीयसाप्रयत्नेनेत्यर्थः ज्ञानहेतुविवक्षायामप्यादिकथमप्यर्थेकथमादितथाप्युंतेयत्नगौरववा
ढयोरिसुत्ववलक्षस्थित्वाचिरंदध्यौचिंतयामासध्यैचिंतायामितिलिट्मनोविकारोपशमनपर्यंतमितिशेषः

तस्याःस्थित्वाकथमपिपुरःकौतकाधानहेतोरंतर्बाष्पश्चिरमनुचरोराजराजस्यदध्यौ मे
घालोकेभवतिसुखिनोप्यन्यथावृत्तिचेतःकंठाश्लेषप्रणयिनिजनेकिंपुनर्दूरसंस्थे ३ ॥

विकारहेतुमाह मेघेति तथाहि मेघालोकेमेघदर्शनेसतिसुखिनोपिप्रियादिजनःसंगतस्यापिचेतश्चित्तंअन्य
थावृत्तिविकारोयस्यतदन्यथावृत्तिर्भवतिविकृतिमापद्यतइत्यर्थः कंठाश्लेषप्रणयिनिकंठालिंगनार्थिनि
सि जनेदूरेसंस्थितेतिर्यस्यतस्मिन्दूरसंस्थेसतिकिंपुनः विरहिणांकिंवक्तव्यमित्यर्थः विरहिणांमेघसंदर्शनमुद्दी
पनमित्यर्थः अर्थांतरन्यासोलंकारःतदुक्तंदंडिनाज्ञेयःसोर्थांतरन्यासोवस्तुप्रस्तुत्यकिंचनःतत्साधनसमर्थस्य। ३
न्यासोयोन्यस्यवस्तुनःइति ३ ॥

प्रथमसमादिवसेनातः कारणात् सन् किं कृतवानित्यत आह प्रत्यासन्न इति स प्रकृतः पथ्यिः इत्यर्थः नभसि श्राव
णमासि नभः श्रावणो नभाः इत्यमरः प्रत्यासन्ने आषाढस्यानंतरत्वात्संनिकृष्टे प्राप्ते सतीत्यर्थः दयिताजीविता
लंबनार्थी सन् वर्षाकालस्य विरहिदुःखजनकत्वादन्यथा प्रतीकारादनर्थोत्पत्तिप्रतिबंधपर्वसमितिन्यायेन शोके।
वप्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः जीवनस्य जलस्य मूतः पुटबंधो जीमूतनस्वामीतिछेदो दरत्वात्साधुः तेन जी
मूतेन जलधरेण प्रयोज्येन स्वकुशलमयीं स्वदेमप्रधानां प्रवृत्तिं वार्ता वार्त्ता प्रवृत्तिवृत्तांत इत्यमरः हारयिष्यन् प्रा
पयिष्यन् लृट् शेषेचेति चकारात्क्रियार्थायां क्रियोपपदायां लृट् प्रत्ययः जीवनार्थकर्मजीवनप्रदेनैव कर्तव्यमिति।
प्रत्यासन्ने नभसि दयिताजीवितालंबनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिं सः प्रत्यग्रैः कुटज
कुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ४ ॥
भावः हृक्रोरन्यतरस्यामिति कर्मसंज्ञायां विकल्पात्स्वदेकर्तरि तृतीया प्रत्यग्रैः अभिनवैः कुटजकुसुमैः गिरिमल्लि
कापुष्पैः कुटजो गिरिमल्लिकेति हलायुधः कल्पितार्घाय कल्पितोऽनुष्ठितोऽर्घः पूजाविधिर्यस्मै तस्मै मूल्ये पूजाविधा
वर्घ इत्यमरः तस्मै जीमूताय क्रियाग्रहणमपि कर्तव्यमिति संप्रदानत्वाच्चतुर्थी प्रीतिप्रमुखानि प्रीतिपूर्वकाणि
वचनानि यस्मिन्कर्मणि तत्प्रीतिप्रमुखवचनं यथा तथा शोभनमागतं स्वागतं स्वागतवचनं प्रीतः सन् व्याजहार कुशलागम
नं पप्रच्छेत्यर्थः नाथ नन्वत्र प्रत्यासन्ने नभसि समागमे न प्रत्यासन्ने सति मार्गीयानुपादः कल्पितः प्रत्यासन्ने प्रकृ
तिमापन्ने सतीत्यर्थः तदसत्यमस्त्वेतेनैव पूर्वापरविरोधः प्रदर्शितः सामग्रीसिराषाढस्य प्रथमदिवसे इत्येतस्यया

मे॰ टी॰ ४ ननुचेतनसामर्थ्यंकस्मादचेतनेनकारयितुंप्रवृत्तः इत्यपेक्षायांकविःसमाधयति धूमेति धूमश्चज्योतिश्चसलि-
लंचमरुच्चतेषांसन्निपातःसंघातोमेघः क्वअचेतनत्वात्संदेशानर्हइत्यर्थः पटुकरणैःसमर्थैरिंद्रियैःक
रणैस्साधकतमंक्षेत्रंगात्रेंद्रियेष्वित्यमरः प्राणिभिश्चेतनैः प्राणीतुचेतनोजन्मीत्यमरः प्रापणीयाःप्रापयित
व्याःसंदेशार्थाइतिसंदेशास्तेपवार्थाः क्वइत्येवमौत्सुक्यादिष्टार्थोद्युक्तत्वात् इष्टार्थोद्युक्तउत्सुकइत्यमरः अप

धूमज्योतिःसलिलमरुतांसन्निपातःक्वमेघः संदेशार्थाः
क्वपटुकरणैःप्राणिभिःप्रापणीयाः इत्यौत्सुक्यादपरिगणयन्गुह्य
कस्तंययाचेकामार्ताहिप्रकृतिकृपणाश्चेतनाचेतनेषु ५ ॥

युक्त

रिगणयनअविचारयनगुह्यकोयत्तंमेघंययाचेयाचितवान् इयाद्ययाञ्चायांतथाहिकामार्ताःमदा
नातुराःचेतनाश्चाचेतनाश्चतेषुविषयेप्रकृतिकृपणाःस्वभावदीनाःकामार्थानायुक्ताविवेकशून्यत्वात्अ
चेतनायाञ्चामवरुध्यन्तइत्यर्थः अत्रमेघसंदेशयोर्विरूपयोर्घटनाद्विरूपघटनारूपोविषयेमालंकारः।त
दुक्तंविरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्यवाभवेत् विरूपघटनावासौविषमालंकृतिस्त्रिधाथार्थान्तरन्यासो ५
तुप्राणिनस्तत्समर्थकत्वेनैवचतुर्थपादेनसोपन्यासात् ५ ॥

मे॰टी॰ ५ संतप्तानामिति हे पयोद जलद त्वं संतप्तानां आतपेन प्रवासविरहेण च संज्वरितानां संतापः संज्वरः समावित्यम ४
रः शरणं आतपखिन्नानां पयोदानेन प्रोषितानां स्वस्थानप्रेरणाया चरक्षकोसि शरणं गृहरक्षित्रोरित्यमरः न।
तस्मात्कारणात् धनपतेः कुवेरस्य क्रोधेन कोपेन विश्लेषितस्य प्रियावियोजितस्य मे मम संदेशं वार्तां प्रियायाः
हरप्रियां प्रतिनयेत्यर्थः संदेशम् सामान्ये षष्ठी संदेशहरणेन आवयोः संतापं नयेत्यर्थः कुत्रस्थाने सा स्थिता न तस्याः

संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः संदेशं मे हर धनपति
क्रोधविश्लेषितस्य गंतव्या ते वसतिरलका नाम यक्षेश्वराणां
वाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या ७ ॥

तस्याः किं व्यावर्तकं तत्राह गंतव्येति वहिर्भवं वाह्यं वहिर्देवपंचजनेभ्यश्चेति वक्तव्यमिति यञ्प्रत्ययः वाह्ये उ
द्याने स्थितस्य हरस्य शिरसि या चंद्रिका तया धौतानि निर्मलानि हर्म्याणि धनिकभवनानि यस्यां सा तथोक्ता ५
हर्म्यादि धनिनां वास इत्यमरः अनेनास्यातिकमत्कं अलकानाम अलकेति प्रसिद्धा यक्षेश्वराणां वसतिर्वासस्था
नं ते तव गंतव्या त्वया गंतव्येत्यर्थः कृत्यानां कर्तरि षष्ठी ७ ॥

संप्रतीयांचाप्रकारमाह ज्ञातमिति हेमेघत्वांभुवनेषुविदितेप्रसिद्धेभुवनविदितेनिष्टेतिभूतार्थेक्तः मतिबुद्धीत्यादिना
वर्तमानार्थत्वेपिक्तस्यचवर्तमानइतिभुवनशब्दस्यषष्ठ्यंततानियमात्समासोनस्यात्केनचपूजायामितिनिषेधात्
पुष्करावर्तकास्तपुष्करावर्तकानामकेचिन्मेघानांकूटस्थास्तेषांवंशेजातमहाकुलप्रसूतमित्यर्थः कामरूपमि-
च्छाधीनविग्रहंदुर्गादिसंचारक्षममित्यर्थः मघोनइंद्रस्यप्रकृतिपुरुषंप्रधानपुरुषंजानामितेनत्वन्महत्वादिज्ञाना
न्निमित्तादि गुणायोगित्वेनहेतुनाविधिवशाद्दैवायत्तत्वात्विधिर्विधानेदैवेचेत्यमरः वशआयत्तेवशमिच्छाप्रभे
दयोरितिविश्वः दूरेबंधुर्यस्यसदूरबंधुःवियुक्तभार्योहंत्वयिअर्थित्वंयाचकत्वंगतः याचकस्ययांचागुणोत्कर्षःक्व

ज्ञातंवंशेभुवनविदितेपुष्करावर्तकानांजानामित्वांप्रकृतिपुरुषंकामरूपंमघोनः तेनार्थि
त्वंत्वयिविधिवशाद्दूरबंधुर्गतोहंयाच्ञामोघावरमधिगुणेनाधमेलब्धकामा ६ ॥

त्रोपयुज्यतइत्याशंक्यदैवाद्याच्ञाभंगोभंगोपिलाघवदोषाभावोपयोगइत्याहयांचेति तथाहि अधिगुणेअधिक
गुणेपुंसिविषयेयाच्ञामोघाविफलापिवरमीषत्प्रियंप्रदानगुणाढ्यत्वात्प्रियत्वंयाच्ञावैफल्यादीषत्प्रियत्वमितिभा
वः अधमेनिर्गुणेयाच्ञालब्धकामापिसफलापिनवरंईषत्प्रियामपिनभवतीत्यर्थः देवाद्वृतेवरःश्रेष्ठेत्रिषुक्लीबेम-
नाकप्रियमित्यमरः अर्थांतरन्यासाप्रस्तुतप्राणितःप्रेयोलंकारः तदुक्तंदंडिनाप्रेयःप्रियतराख्यानमित्येतदाद्यया
दत्रयेचतुर्थपादस्येनार्थांतरन्यासेनापज्जीवितमितिमुक्तव्यमेतत् ६ ॥

मे॰टी॰
९

मंदंमंदमिति अनुकूलपवनोवायुस्त्वांमंदंमंदंनुदतिमंदमित्यर्थः अत्रकश्चिद्विद्वांस्तथामेवहिरूक्तिनिर्वाहा
प्रकारेगुणवचनस्येतितदाश्रयेणात्तकर्मधारयवद्भावेवाप्रके सुपूर्वकिमंदमंदमितिस्यात् तदेवाहवामनःमं
दमंदमित्यत्राप्रकारार्थेद्विर्भावइतियथासदृशभाविफलानुरूपमित्यर्थः यथासादृश्ययोगपत्त्वीप्सास्वनति
क्रमइतियादवः नुदतिप्रेरयति अयंसगंधः सगर्वः संबंधइतिगंधोगंधकआमोदेलेशे संबंधगर्वयोरित्युभय
त्रापिविश्वः तेनववामोवामभागस्थः वामस्तुवक्रेरम्येस्यात्सव्येवामांगकेपिचेतिशाश्वतःअपिचातकः पदिवि

मंदंमंदंनुदतिपवनश्चानुकूलोयथात्वांवामश्चायंनदतिमधुरंचातकस्तेसगंधः गर्भाधानक्षणपरि
चयान्नूनमाबद्धमालाः सेविष्यंतेनयनसुभगंखेभवंतंबलाकाः ९ ॥ शेषश्चमधुरंश्राव्यंनदतिव्याहर
तिइदंनिमित्तद्वयंवर्त्ततेवर्तिष्यतेचापइतिमित्तमाहगर्भेति गर्भःकुक्षिस्थोजंतुःगर्भोभ्रूणइमौकुक्षौस्त्रौ
तेयनसंकटकेकुक्षौकुक्षिस्थजंतुश्चेतियादवः तस्याधानमुत्पादनं तदेवक्षणउत्सवः सोविद्यतेयेनादितिभावः
निर्व्यापारस्थितौकालविशेषोत्सवयोःक्षणइत्यमरः तस्मिन्परिचयादभ्यासाद्धेतोःखेव्योम्न्याबद्धमालाःग
र्भाधानसुखार्थं त्वत्समीपवद्धपंक्तयःइत्यर्थः उक्तंचकर्णोदयेगर्भंबलाकादधतेभ्रयोगान्नाकेनिबद्धावल
यःसमंतादितिबलाकाःबकांगनानयनसुभगांदृष्टिप्रियंभवंतंनूनंसत्यंसेविष्यंते अनुकूलमारुतचातकश

ले ... वि ५ ॥

सहर्षं प्रवृत्तस्य ते पथिकांगनाश्वसनमानुषंगिकं फलमाह त्वामिति पवनपदवीमाकाशमारूढं त्वां पंथान्तेगच्छं
तीति पथिकाः पथः कान्निकर्षन्त्यस्तपः तेषां वनिताप्रोषितभर्तृकाः प्रत्ययात् प्रियागमनविश्वासात् प्रत्या
याः धीनश्रापथ्यज्ञानविश्वासहेतुश्चित्यमरः आश्वसंत्योविश्वसिताः पाणिभ्यांमस्तस्थसिथानेः शश्नेनाडगीतस्ते
ङीप् तथा उद्गृहीतालकान्ताः दृष्टिप्रसारार्थमुन्नमय्योद्धृतालकाग्राः सत्यः प्रेक्षिष्यंते अन्तुत्कर्षतयाद्रक्ष्यंतीत्य

त्वामारूढं पवनपदवीमुद्गृहीतालकांताः
प्रेक्षिष्यंते पथिकवनिताः प्रत्ययादाश्वसंत्यः
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योप्यहमिव जनो यः पराधीनवृत्तिः ८

र्थः तथाहि त्वयि सन्नद्धे व्याप्टते सति विरहेण विधुरां विकलां जायां क उपेक्षेत न कोपीत्यर्थः अन्योपि सम्भवति ।
निकोपि यो जनोहमिव पराधीनवृत्तिः परायत्तजीविको न स्यात् स्वतंत्रस्तु न कोप्युपेक्षेतेति भावः इत्यर्थान्तरा ।
न्यासः ८ निमित्तान्यपि शुभानि दृश्यन्त इत्याह ॥

मे॰ टी॰ ७

संप्रति सहायसंपत्तिश्चास्तीत्याह कर्तुमिति यद्गर्जितं कर्तृ महीमुच्छिलीन्ध्रामुद्भूतकंदलिकां कंदलो वा शि 12
लीन्ध्रः स्यादिति शाश्वतार्णवे अतएवावंध्यां कर्तुं प्रभवति शक्नोति शिलीन्ध्राणां भाविसस्यसंपत्तिसूचकत्वा
दिति भावः तदुक्तं निमित्तनिदाने कालाभ्रयोगादुदिताः शिलींध्राः संपन्नसस्यां कथयंति धात्रीमिति
तच्छ्रवणसुभगं श्रोत्रसुखं लोकस्येति शेषः तेन वा गर्जितं श्रुत्वा मानसोत्काः मानसे सरसि उन्मनसः उत्सु
काः इति यावत् उत्क उन्मना इति निपातनात्साधुः कालांतरे मानसस्य हिमदुष्टत्वात् हिमसंदेहान्तो रोगदे

कर्तुं यच्च प्रभवति महीमुच्छिलींध्रामवंध्यां तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः
आकैलासाद्बिसकिशलयच्छेदपाथेयवंतः संपत्स्यंते नभसि भवतो राजहंसाः सहायाः

॥ ११ ॥

तत्रादन्यत्रगताः हंसाः पुनर्वर्षासु मानसमेव गच्छंतीति प्रसिद्धं बिसकिशलयानां मृणालाग्राणां छेदैः श
कलैः पाथेयवंतः पथि साधु पाथेयं पथिभोज्यं पथ्यतिथिवसतिस्वपतेर्ढञ् इति ढञ् तेन मृणालशकलवंतः इत्य
र्थः राजहंसाः हंसविशेषाः राजहंसास्तु ते चंचुचरणैः लोहितैः सिता इत्यमरः नभसि व्योम्नि भवतस्तव आकै
लासात् कैलासपर्यंतं पदद्वयं चैतत् सहायाः सहयात्रा सहायः सहपात्रः स्यादिति शाश्वतार्णवे संपत्स्यंते सं

नचतस्मान्नाशाद्भूतस्खलनाद्वानिरर्थकस्त्वन्मयायासइत्याह तांचेति हेमेघदिवसानामवशिष्टदिनानांगणनायांसं 13
लग्ने तत्परामासक्तांतत्परेप्रसितासक्तावित्यमरः अतएवाव्यापन्नाममृतांआशापाशेनमदागमनप्रत्याशया
जीवंतीमित्यर्थः एकःपतिर्यस्यास्तांएकपत्नींपतिव्रतामित्यर्थः नित्यंसपत्न्यादिष्वितिङीपुत्स्वकाराश्चभ्रातुर्मेजा
यांमात्रवन्निःशंकंदर्शनीयामित्याशयः तांमन्नियोगावहतगतिःसफलगतिःसन् अवश्यंद्रक्ष्यसिआलोक

तांचावश्यंदिवसगणनातत्परामेकपत्नीमव्यापन्नामवहत
गतिर्द्रक्ष्यसिभ्रातृजायां आशाबंधःकुसुमसदृशंप्रायशोह्यं
गनानांसद्यःपातिप्रणयिहृदयंविप्रयोगेरुणद्धि १० ॥

यिष्यसितथाहिआशातितृष्णाआशादिगतितृष्णयोरितियादवः बध्यतेऽनेनेतिबंधोवंधनंवृन्तमितियावत्
आशैववंधःकर्तृप्रणयिप्रेमयुक्तं अतएवकुसुमसदृशंसुकुमारमित्यर्थः अतएवविप्रयोगेविरहेसद्यःपा
तिसद्योभ्रंशनशीलमंगनानांहृदयंजीवितंहृदयंजीवितेचित्तेवक्षस्याकूतयोरितिशाश्वतःप्रायशःप्रा
येणरुणद्धिपतितवध्नातीत्यर्थोतरन्यासः १० ॥

मार्गमिति हे जलद तावदिदानीं कथयतः मत्तः इति शेषः त्वत्प्रयाणस्यानुरूपमनुकूलं मार्गमध्वानं मार्गोम
ग पदेमासे मोम्यर्दे यल्लेषणोः शृणु इति यादवः शृणु तदनु मार्गश्रवणानन्तरं श्रोत्राभ्यां पेयं पानार्हं श्रुतिसुख
याश्रोतव्यमित्यर्थः पेयं ग्रहणात्सन्देशस्यामृतसाम्यं गम्यते मे मम सन्देशं वाचिकं सन्देशवाग्वाचिकं स्यादि
त्यमरः श्रोष्यसि यत्र मार्गे खिन्नः खिन्नः भीतः तांतो क्षीणः बलः सन् नितिम्नमवीप्सयोरिति नितरामर्थे द्विर्भावः शि

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं संदेशं मे तदनु
जलदश्रोष्यसिश्रोत्रपेयं खिन्नः खिन्नः शिखरिषु पदं न्यस्य गंता
सि यत्र क्षीणः क्षीणः परिलघु पयः श्रोतसां चोपभुज्य १३ ॥

खरिषु पर्वतेषु पदं न्यस्य नितिष्य पुनर्बललाभार्थं कंचिद्विश्रम्येत्यर्थः क्षीणः क्षीणः भीतः कृशाः सन् सत्र
पि क्षुदं तत्वान्सर्ववत्वादिकृतिः श्रोतसां परिलघु गुरुत्वदोषरहितं उपलास्फालनेन खेदनत्वात्पथ्यमित्य
र्थः यदाहवाग्भटः उपलास्फालनेतादेपविच्छेदैः खेदितोदकाः हिमवन्मलयोद्भूताः पथ्यानद्यो भवन्त्यमूरि ८
ति पयः पानीयं उपभुज्य शरीरपोषणार्थमभ्यवहृत्य गंतासि गमिष्यसि गमेर्लृट् १३ ॥

आपृछस्वेति प्रियं सखायं प्रियसखं राजाहः सखिभ्यष्टजिति टच् समासांतः तुंगमुन्नतं पुंसां वंद्यैः स्तुत्यैः रघुपतिपदैः रामपदन्यासैः मेखलासु कटकेषु ग्रथमेखला श्रोणिस्थाने ऽद्रिकटके कटिबंधे ऽसिबंधने इति यादवः अंकितं चिह्नितं तं इत्थं सखित्वान्महत्वात्पवित्रत्वाच्च संभावनार्हं अमुं शैलं चित्रकूटाद्रिमालिंग्य आपृछस्व संभाषयोपामीन्त्यामंत्रणेन सभाजय स्वग्रामंत्रणसभाजने आपृछनमित्यमरः आङि नुपृछ्योरिति

आपृछस्व प्रियसखममुं तुंगमालिंग्य शैलं वंद्यैः पुंसां रघुप
तिपदैरंकितं मेखलासु कालेकाले भवति भवतो यस्य संयो
गमेत्य स्नेहव्यक्तिश्चिरविरहजं मुंचतो बाष्पमुष्णं १२ ॥

त्मनेपदं सखित्वं निर्वहति कालेकाले प्रतिप्रावृट्कालेषु त्वत्समागमेन कालशब्दे वीप्सायां द्विरुक्तिः भवतः संयोगं संपर्कमेत्य चिरविरहजमुष्णं बाष्पमुष्णेन जलेन च बाष्पो नेत्रजलोष्मणोरिति विश्वः बाष्पं मुंचतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमाविर्भावो भवति स्निग्धानां चिरसंगतानां बाष्पपातो भवतीति भावः १२ ॥

मे.टी. ५ नांपरिहर्न्नायस्मिन्नाश्यावेतस्मात्स्थानात् उदङ्मुखो निर्दोषत्वादुन्नतमुखः सन्पथि दिङ्नागाचार्यस्य का 16
लिदासप्रतिपक्षस्य हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि चेति
विश्वः अद्रेः शिकल्पस्य दिङ्नागाचार्यस्य शृंगशाखाम्यस्मान्नोऽस्मि मनमरः हरतीति दृष्ट्वा नासिद्धैः सारस्वतसिद्धैः म

स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान्
१४ ॥

दारुकविभिरंगनाभिः स्त्रीभिश्च दृष्टोत्साहः सन्नाकशुन्यतन उद्ग्रीर्भवेति स्तब्धप्रवंधय आत्मानं वा प्रतिकवेरुक्तिकिरि ५
ति संसर्गात्तो दोषगुणा भवंति इत्येतन्मृषार्थेन जलाशयेऽपि स्थिताननुकूले निचुलस्थलेतमात्मानमारदति
सिंधुवेगादित्यनेन श्लोकनिर्माणात् तस्य कवेः निचुलसंज्ञेत्याह ॥ १४ ॥

अद्रेरिति पवनो वायुरद्रेश्चित्रकूटस्य शृंगं हरति किंस्वित् किंस्विच्छब्दो वितर्कार्थे चादिषु पठितः इति शंक
याउन्मुखीभिरुन्नमितमुखीभिः सागाच्छायापदर्शनादस्मयोगोपपादिति ऊपुमुग्धाभिर्मूढाभिः सिद्धानां॥
देवयोनिविशेषाणामंगनाभिः मुग्धः सुन्दरमूढयोरित्यमरः चकितचकितं चकितप्रकारं यथा तथा॥
प्रकारेगुणवचनस्येतिद्विर्भावः दृष्टोत्साहो दृष्टसंरंभः सन्सरसाः आर्द्राः निचुलाः स्थलवेतसा यस्मिन्

अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभिः
दृष्टोत्साहश्चकितचकितैर्मुग्धसिद्धांगनाभिः

स्मात्वानीरेकविःप्रभेदेस्यान्निचुलःस्थलवेतसइतिशब्दार्णवे अस्मात्स्थानादाश्रमात्पथिनभोमार्गे।
दिङ्नागानांस्थूलाःयेहस्ताःकरास्तेषांअवलेपान्आलेपान्परिहरन्हस्तोनक्षत्रभेदेस्यात्करेभकरयोरपी
तिविश्वः उदङ्मुखः सन्अलकायाउदीच्यत्वादित्याशयः खमाकाशंपतस्वउत्पतस्वऋच्छअत्रेदमर्थान्तरंध्वनय
तिसरसोरसिकोनिचुलोनामकविःकालिदासस्यसहाध्यायःसपरापादितानांकालिदासप्रबंधदूषणा

त्वयीति कृषेर्हलकर्मणः फलं सस्यं त्वयि अधिकरणत्वविवक्षायां सप्तमी आयत्तमधीनं अधीनो निघ्न आयत्त
इत्यमरः इति हेतोः प्रीत्या स्निग्धैरकृत्रिमप्रेमार्द्रैरित्यर्थः भ्रूविकाराणां भ्रूविलासानामनभिज्ञैर्ग्राम्यत्वादिति
शेषः जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सन् अतितृष्णया निरीक्ष्यमाणः सन् मालं मालाख्येते।
ऽद्रपोलग्रायमुन्नतस्थलं मालमुन्नतभूतलमित्युज्वलः सद्यस्तत्कालमेव सीरैर्हलैः उत्कषणेन सुरभिघ्राण
तर्पणं यथा तथा आरुह्य तत्रागमिष्यसीत्यर्थः सुरभिर्घ्राणतर्पणमित्यमरः किंचित्पश्चाद्व्रज गच्छ लघुगतिल

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः प्रीतिस्निग्धैर्जनपदव
धूलोचनैः पीयमानः सद्यः सीरोत्कषणसुरभिक्षेत्रमारुह्य मालं किं
चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण १६ ॥

ऽप्रतिविशिष्टत्वात् क्षिप्रगमनः सन् लघुः क्षिप्रमरं द्रुतमित्यमरः भूयः पुनरपि उत्तरेणैव उत्तरमार्गेणैव व्रजेत्य
नुषंगः तृतीयाभिधाने प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया यथा कश्चित् वह्वल्लभापतिः कुत्रचित् क्षेत्र
कलत्रे गृहं च विहृत्य स्वेदे क्षेत्रे शरीरे केदारे सिद्धस्थानकलत्रयोरिति विश्वः दातिएपमेंगभयात्वीचमार्गेण निर्गत्य १०
पुनः सर्वापदंतेषु चरति तद्वदिति ध्वनिः १६ ॥

रत्नेति रत्नछायानां पद्मरागादीनां मणिप्रभाणां व्यतिकरो मिश्रणमिव प्रेक्ष्यं दर्शनीयं आखंडलस्येंद्रस्य धनुः
खंडमेतत् एतदिति हस्तनिर्देशो विवक्षितः पुरस्तादग्रे वल्मीकाग्रात् वामलूरविवरात् वामलूरश्च नाकु
श्च वल्मीकं पुन्नपुंसकमित्यमरः प्रभवत्याविर्भवति येन धनुःखंडेन ते तव श्यामं वपुः स्फुरितरुचिना उज्व

रत्नछायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्तात्
वल्मीकाग्रात्प्रभवति धनुःखंडमाखंडलस्य
येन श्यामं वपुरतितरां कांतिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः
१५ ॥

लकांतिना बर्हेण पिच्छेन पिच्छबर्हे नपुंसकमित्यमरः गोपवेषस्य विष्णोर्गोपालस्य कृष्णस्य श्यामं वपुरिवा।
तितरां कांतिं शोभामापत्स्यते प्राप्स्यति १५ ॥

छन्नेति हे मेघ परिणतैः परिपक्वैः फलैर्द्योतंत इति तथोक्तैः आषाढे च नचूताः फलंतीपक्वंते च मेघवातेनेनेत्याश
यः काननाम्रैर्वनचूतैः छन्नोपांतः आवृतपार्श्वः अचलः आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशवंयच्छायेश्यण
मवर्णे इत्यर्थः वेणीत्वकेशबंधे जलस्नुतावितिपाठः त्वयि शिखरं शृंगमारूढे सति यस्य च भावेन भावलक्ष

छन्नोपांतः परिणतफलद्योतिभिः काननाम्रै
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां मध्ये
श्यामः स्तन इव भुवः शेषविस्तारपांडुः १८ ॥

णामितिसप्तमी मध्ये श्यामः शेषे विस्तारे पांडुः मध्यादन्यत्र विस्तारे परितः पांडुर्हरिणः पांडुरः पांडुरित्यमरः भुवः
स्तन इव अमरमिथुनानां खेचराणां रतिभावः प्रेक्षणीयां दर्शनीयामवस्थां नूनं यास्यति मिथुनग्रहणं कामिना
मेव स्तनत्वेनोत्प्रेक्षा भवतीति कृत्वा यथा रतिश्रान्तः कश्चित्कामी कामिनीकुचकलशे विश्रांतः स्वपिति तद्वद्भवान्

पिधु वः मापिका पाः स्तनइतिध्वनिः १८ ॥

त्वामिति आम्राः चूताः कूटेषु शिखरेषु यस्य स आम्रकूटो नाम सानुमान् पर्वतः आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौ
रभः इत्यमरः आसारो धारासंपातः आसारः इत्यमरः तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तं कृतोपका
रमित्यर्थः अध्वश्रमेण परिगतं व्याप्तं त्वां साधु सम्यक् मूर्ध्ना वक्ष्यति वोढा भवेदित्यर्थः तथाहि क्षुद्रः कृपणोऽपि क्षुद्रो द
रिद्रे कृपणे नृशंसे इति यादवः संश्रयाय संश्रयणाय मित्रे सुहृदि मित्रं सखा सुहृदित्यमरः प्राप्ते आगते स

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रम
परिगतं सानुमानाम्रकूटः न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः १७ ॥

ति प्रथमसुकृतापेक्षया पूर्वोपकारपर्यालोचनया विमुखो न भवति यस्तथा तेन प्रकारेण उच्चैः उन्नतः स च आम्र
कूटः किं पुनर्विमुखो न भवतीति किमु वक्तव्यमित्यर्थः एतेन प्रथमावसथे सौख्यलाभात्कार्यसिद्धिरस्तीति सूचितं
तदुक्तं निमित्तनिदाने प्रथमावसथे सौख्यं तस्याविलंब्य निश्रमं भवति यात्रायामन्यथा त्वशुभं ध्रुवमिति १७ ॥

तस्मैति देमेघवांतवृष्टिः उद्गीर्णवर्षः मनक्कृतवमनस्यप्रजपतेर्वांतेत्यत्र आदितस्येतिचकारादि्प्रतिषेधः ति
क्तैः सुगंधिभिः तिक्तरसवद्भिश्चतिक्तोरसेसुगंधेचेतिविश्वः वनगजमदैर्वासितंसुरभितंभावितंच हिमवद्विं
ध्यमलयागजानांप्रभवानगाश्चतिविंध्यस्यगजप्रभवत्वादितिभावः जंबूकुंजप्रतिहततरयंप्रतिवद्धवेगंसुखवेयेय
मित्यर्थः अनेनलघुत्वंकषायभावनाचदर्श्यते तस्यारेवायास्तोयमादायगच्छेर्घनदेमेघअंतःसारोवलंयस्य
सत्वंतामनिलश्चाकाशवायुःशरीरस्यगमयितुंतुलयितुंनशक्ष्यतिशक्तोनभविष्यति तथाहिरिक्तोतःसारशून्यः

तस्यास्तिक्तैर्वनगजमदैर्वासितंवांतवृष्टिः जंबूकुंजप्रतिह[illegible]
तरयंतोयमादायगच्छेः अंतःसारंघनतुलयितुंनानिलःश
क्ष्यतित्वांरिक्तःसर्वोभवतिहिलघुःपूर्णतागौरवाय २० ॥

सर्वोलघुरगुरुर्भवतिप्रकंप्योभवतीत्यर्थः पूर्णतासारवत्तागौरवाय प्रकंप्यतायभवतीत्यर्थः अयमत्रध्व
निः आदौवमनशोधितस्यपुंसः पश्चात्श्लेष्मशोषणायलघुतिक्तकषायपानाल्लब्धवलस्यवातप्रकोपोन।
स्यादितियथादवाग्भट्टः कषायोशादिमात्रस्य विशुद्धश्लेष्मणोहिताः किमुतिक्ताःकषायावानिसर्गानेवा। १२
लावस्याःकृतशुद्धेः क्रमात्पीतापेलायाःपथ्यभोजिनः वातादिभिर्नवाधास्यादिंद्रियैरिवयोगिनः २० ॥

स्थित्वेति इमेववनेचरंतीतिवनचराः तत्पुरुषेकृतिबहुलग्रहणाल्लुग्भवतितेषांवधूभिःभुक्तःकुंजोलतागृ
हापत्रमः तस्मिन्निकुंजकुंजौवाक्लीवेलतादिपिहितोदरेइत्यमरः तत्रेननयेनविनोदोस्मीत्यर्थः तस्मिन्नाम्रकू
टेमुहूर्त्तमल्पकालेनत्वचिरकालंस्वकार्यविरोधादितिभावः मुहूर्त्तमल्पकालेस्याद्घटिकाद्वितयेपिचेतिश
ब्दार्णवेस्थित्वाविश्रम्यतोयोत्सर्गेणत्वयात्यक्तेनवर्षेण द्रुततरगतिर्लाघवाद्धेतोःक्षिप्रगमनःसन् तस्मादा
म्रकूटात्परमनंतरंवर्त्ममार्गंतीर्णोऽतिक्रांतःउपलैःपाषाणैःविषमेविंध्यस्याद्रेःपादेप्रत्यंतपर्वते पादाः

स्थित्वातस्मिन्वनचरवधूभुक्तकुंजेमुहूर्तंतोयोत्सर्गद्रुततरगतिस्तत्परंवर्त्मतीर्णः रेवांद्र
क्ष्यस्युपलविषमेविंध्यपादेविशीर्णांभक्तिच्छेदैरिवविरचितांभूतिमंगेगजस्य १९ ॥

प्रत्यंतपर्वताइत्यमरः समंततोविस्तमरांयतेनकस्याश्चिदतिकामुकाःप्रियचरणपातेपिध्वंस्यतेस्वांनर्म
दांरेवांतुनर्मदासोमोद्भवामेकलकन्यकाइत्यमरः गजस्यांगेशरीरेभक्तयोरचनाः रेखाइतियावत्भक्तिनि
षेवनेभागेरचनायामितिशब्दार्णवे तासांछेदैःभंगिभिःविरचितांभूतिंशृंगारमिवभासितमिववाभूतिर्मा
तंगशृंगारेजातौभस्मनिसंपदीतिविश्वः इत्यस्मिन्प्रथममपिमदांधेननयनकौतुकलाभइतिभावः १९ ॥

मे॰टी॰ प्रदिग्भमपिव्याख्यायते अंभइति अंभोविंदूनांवर्षोदकविंदूनांग्रहणेसर्वसहापतितमेवनचातकस्पृशंतिभूसं
१३ स्पृष्टोउदकस्यतेषांरोगहेतुत्वादंतरालपवसीकरेचतुरान्‌ चातकान्वीक्ष्यमाणाःकौतुकात्पश्यंतःश्रेण्या
यःश्रेणयोभूताःश्रेणीभूताःवहुपंक्तीः अभूततद्भावेच्विःकुगतिप्रादयःइतिसमासः अथवाअश्रेणयःश्रेणयो
भूताः अत्रापिच्व्यर्थविवक्षायांपूर्ववत्समासःच्व्यर्थमात्रविवक्षायांतुश्रेण्यादयःकृतादिभिरितिसमासः॥

अंभोविंदुग्रहणचतुरांश्चातकान्वीक्ष्यमाणाः श्रेणीभूताःपरि
गणनयानिर्दिशंतोवलाकाः त्वामासाद्यस्तनितसमयेमानयिष्यं
तिसिद्धाः सोत्कंपानिप्रियसहचरीसंभ्रमालिंगितानि २२ ॥

विलाकाविशाकंटिकाःपरिगणनयापकाद्वेतिस्रः इतिसंख्यानेननिर्दिशंतोहस्तेनदर्शयंतःसिद्धाःकिन्नराः
स्तनितसमयेगर्जितकालेसोत्कंपानिसकंपानिपूर्वकानिप्रियसहचरीणांसंभ्रमेणालिंगितानिआसाद्यत्वयंप्र १३
प्राप्यएवसंभवमनुभूयेत्यर्थः त्वांमानयिष्यंतिस्तोष्यंतित्वत्संनिधानात्सुखलाभइत्यर्थः २२ ॥

25

नीपमिति सारंगाभृंगामातंगाश्चकुरंगाश्चसारंगाश्चातकेभृंगेकुरंगेचमतंगजेइतिविश्वः अर्धरूढैरेकदेशोद्गतैः। केसरैःकिंजल्कैःहरितःपालाशवर्णःपालाशोहरितोहरिदित्यमरःकपिशःश्यामवर्णःश्यावःस्यात्कपिशो धूम्रधूमलौकृष्णलोहितइत्यमरः हरितंचतत्कपिशंहरितकपिशंश्यामवर्णमितियावत् वर्णोवर्णेनेतिस मासःनीपंस्थलकदंबकुसुमंअथस्थलकदंबकेनीपःस्यात्पुलकःश्रीमान्प्रावृषेण्योहरिप्रियइतिशब्दार्ण वेदृष्ट्वासंप्रेक्ष्यविदित्वेतियावत् तथाकच्छेष्वनूपेषुअनुकच्छंअव्ययंविभक्तीत्यादिनाविभक्त्यर्थेव्ययीभावःज

नीपंदृष्ट्वाहरितकपिशंकेसरैरर्धरूढैराविर्भूतप्रथममुकुलाःकंदलीश्चानुकच्छं जग्ध्वारण्येष्व।
धिकसुरभिंगंधमाघ्रायचोर्व्याः सारंगास्तेजललवमुचःसूचयिष्यंतिमार्गं २१ ॥

लशायमनूपेस्यात्पुंसिकच्छस्तथाविधः इत्यमरः आविर्भूताःप्रथमाःप्रथमोत्पन्नामुकुलाःयासांताःकंद। लीभूकंदलीद्रोणपर्णीस्निग्धकंदाकंदलीभूकंदलपीतिशब्दार्णवेजग्ध्वाभक्षयित्वाअदोजग्धिर्ल्यप्तिकिति इत्यदेशेजग्धिरादेशः अरण्येष्वधिकसुरभिमतिसुरभिघ्राणतर्पणंदग्धारण्योषधितियादवदग्धारण्येषुविशेष सामर्थ्यवशात्किंचकंदलीश्चदृष्ट्वेत्यन्वयोद्रष्टव्यः उर्व्याः भूमेर्गंधमाघ्रायजललवमुचःउदकबिंदुवर्षकस्य तेमार्गं अनुमापयिष्यंतिसूचयिष्यंतियत्रयत्रवृष्टिःकार्येनीपकुसुमादिकंदृश्यतेतत्रतत्रान्वयाद्दृष्टमिति

२५ ॥

मे॰ टी॰ १४ पांड्विति हे मेघ त्वय्यासन्ने सति सन्निकृष्टे सति दशार्णाः नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैः 26
विकसितैः केतकीमुकुलाग्रेष्वपि सूचिः स्यादिति शाश्वतः केतकैः केतकीकुसुमैः पांडुच्छाया पांडुवर्णा उप
वनानां वृतयः कंटकशाखावरणानि येषु ते तथोक्ताः प्राचीनं प्रांततो वृतिरित्यमरः तथा गृहबलिभुजां काका
दिग्राम्यपक्षिणां नीडारंभैः कुलायनिर्माणैः कुलायो नीडमस्त्रियामित्यमरः चित्याया इमानि चैत्यानि रथ्यावृता

पांडुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर्नीडारंभैः गृहबलिभु
जामाकुलग्रामचैत्याः त्वय्यासन्ने परिणतफलश्यामजंबूवनांताः
संपत्स्यंते कतिपयदिनस्थायिहंसा दशार्णाः २४ ॥

चैत्यमायतने बुद्धविवेकोद्यानपादपे इति विश्वः आकुलानि संकीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः तथा
परिणतैः परिपक्वैः फलैः श्यामानि यानि जंबूवनानि येषु तैः अंताः रम्याः स्वरूपावसिते रम्ये समाप्तावंतऽस्त्र
ने इति शब्दार्णवे तथा कतिपयेष्वेव दिनेषु स्थायिनो हंसाः येषु ते तथोक्ताः एवंविधाः संपत्स्यंते संभविष्यंति।
यो वा पुंवति लोकः कतिपयेभ्यो दिना कतिपयशब्दस्यात्र पदत्वेऽपि न तच्छब्दस्यांतरत्वमस्त समासशास्त्रस्यापि

उत्पश्यामिति द्रुतसखेवमेवमत्प्रियायमत्प्रियार्थंतथाद्रुतंत्विप्रंलघुक्षिप्रमरंद्रुतमित्यमरः यियासोर्यातुमिच्छोः।
यियातेः सनंतादुप्रत्ययः तेनतवककुभैः कुटजकुसुमैः सुरभौ सुगंधिनि ककुभः कुटजोऽर्जुन इति शब्दार्णवे पर्व
ते पर्वते प्रतिपर्वतेवीप्सायां द्विरुक्तिः कालक्षेपं कालविलंबं त्वेपो विलंबे निंदायामिति विश्वः उत्पश्यामि उत्प्रेक्षे
विलंबहेतुं दर्शयन्नाशुगमनं प्रार्थयते शुक्लेति सजलानि सानंदबाष्पाणि नयनानि येषां तैः शुक्लापांगैर्मयूरैः
शुक्लापांगाः शिखावल इति यादवः केकामयूरवाणीः केका वाणी मयूरस्येत्यमरः स्वागतीकृत्य स्वागतवच।

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः कालक्षेपं ककुभसुर
भौ पर्वते पर्वते ते शुक्लापांगैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्
युद्यातः कथमपि भवान् गंतुमाशु व्यवस्येत् २३ ॥

नीकृत्य प्रत्युद्यातः प्रत्युद्गतः कृतातिथ्य इत्यर्थः भवान्कथमपि यथाकथंचिदाशु गंतुं व्यवस्येत् उद्युंजीत प्रार्थ
ने लिङ् शेषे प्रथम इति प्रथमपुरुषः शेषश्चार्थं भवच्छब्दो युष्मदस्मच्छब्दव्यतिरेकात् स्वागतीकृत्य केका
सारोप्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात्परिणामालंकारः तदुक्तमलंकारसर्वस्वे आरो
प्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति २३ ॥

मे॰टी॰ २५ नीचैरिति हेमेघतत्रविदिशासमीपेविश्रामःखेदापनयनःभावार्थेघञ्प्रत्ययःमपवदेनप्रसविश्रामहेतोःवि
श्रामकारणात्विश्रामार्थमित्यर्थःषष्ठीहेतुप्रयोगइतिषष्ठीविश्रामेत्यत्रनोदात्तोपदेशस्यमान्तस्यनाचमेरिति
पाणिनीयेवृद्धिप्रतिषेधोपिविश्रामोवेतिवाड्व्याकरणेविकल्पेनवृद्धिविधानात्द्वयरूपसिद्धिःप्रौढपुष्पैः
बहुकुसुमैःकदंबैःनीपवृक्षैःत्वत्संपर्कात्पुलकाश्चास्यसंजाताःपुलकितमिवसंजातःपुलकमिवसंस्थितंतारका
दिभ्यइतच्प्रत्ययःनीचैरित्याख्यायस्यतंनीचैराख्यंगिरिमधिवसेःगिरौवसेरित्यर्थःउपान्वध्याङ्वसइतिक
र्मयःनीचैर्गिरिःपण्याःक्रेयाःस्त्रियःपुण्यस्त्रियोवेश्याःवारस्त्रीगणिकावेश्यापण्यस्त्रीरूपजीविनीतिशाश्वतः
नीचैराख्यंगिरिमधिवसेस्तत्रविश्रामहेतोःत्वत्संपर्कात्पुलकितमिवप्रौढपुष्पैःकदंबैः यःप
ण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानिप्रथयतिशिलावेश्मभिर्यौवनानि २६ ॥
वे तासांरतिभ्यःपरिमलोगंधविशेषःविमर्दोत्थेपरिमलोगंधेजनमनोहरइत्यमरः तमुद्गिरंतिप्रकटतयाविर्भाव
यंतिइतितथोक्तानितैःशिलावेश्मभिःकंदरैर्नागराणांपौराणांउद्दामानिउत्कटानियौवनानिप्रथयतिप्रकटयति
उत्कटयौवनानांकचित्स्मरत्कारावराङ्गनाःविश्रंभविहारकांतिणोमायादिभयात्निशीथसमयेकंचनविमुक्त
वनप्रदेशमाश्रित्यरमयंतिनचात्रबहुलमस्तीतिप्रसिद्धिःप्रयोद्गारिशब्दस्यगौणार्थत्वात्नजुगुप्सावदःप्रस्तु
तकाव्यस्यातिशोभाकरएवतदुक्तंदंडिनाति— तोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयःअतिसुंदरमन्यत्रग्राम्यक

हिं ५ विग्राहननइति २६ ॥

28

29

तेषामिति दिक्षु दिशासु प्रथितं प्रसिद्धं विदिशेति लक्षणं नामधेयं यस्यास्तां लक्षणं नाम्नि चिह्ने चेति विश्वः तेषां।
दशार्णानां संबंधिनीं धीयंतेऽस्यामिति धानी करणाधिकरणयोश्चेति ल्युट् कृद्योगलक्षणषष्ठीसमस्यत इति वक्त
व्यात्समासः राज्ञो धानी राजधानी तां राजधानीं प्रधाननगरीं राज्ञां राजधानीति कथ्यते इति शब्दार्णवे गत्वा प्राप्य स
द्यः शीघ्रं कामुकत्वस्य विलासितायाः विलासी कामुकः कामी स्त्रीपरो रतिलंपट इति शब्दार्णवे अविकलं समग्रं फलं
प्रयोजनं लब्धा आलप्स्यते त्वयेति शेषः कर्मणि लृट् कुतः यद्यस्मात्कारणात्स्वादु मधुरं चलाः ऊर्मयो यस्य तच्चलोर्मि

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलमवि
कलं कामुकत्वस्य लब्धा तीरोपांतस्तनितसुभगं पास्यसि स्वादु य
त्सभ्रूभंगं मुखमिव पयो वेत्रवत्याश्चलोर्मि २५ ॥

तरंगितं वेत्रवत्या नाम नद्याः पयः सभ्रूभंगं भ्रूकुटियुक्तं दशनपीडयेति शेषः मुखमिवाधरमिवेत्यर्थः तीरो।
पांते तटप्रांते यत्स्तनितं गर्जितं तेन सुभगं यथा तथा स्तनितशब्देन मणितमपि ध्वन्यते ऊर्ध्वमुखवलितकंठना।
शाकेंङ्कृतं स्तनितं स्तनितमस्याघोषवदिति मणितलक्षणात् पास्यसि धास्यसि पिबतेर्लृट् कामिनामधरा
स्वादः सुरतादतिरिच्यत इति भावः २५ ॥

मे॰टी॰ वक्र इति उत्तराशां उदीचीं दिशं प्रति प्रस्थितस्य भवतः पंथा उज्जयिनीमार्गो वक्रोऽपि यद्दूरो यद्यपीत्यर्थः विंध्या 30
१९ दुत्तरवाहिन्या निर्विंध्यायाः पश्चिम इति यथा वक्रत्वं तथाप्युज्जयिन्या विशालानगर्याः विशालोज्जयिनी समे
इत्यमरः सौधानामुत्संगेषु उपरिभागेषु प्रणयः परिचयः प्रणयः स्यात्परिचये याचायां सौहृदेपि चेति या।

वक्रः पंथा यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्संगप्रणयविमुखो मा स्म भूरुज्जयिन्या
विद्युद्दामस्फुरितचकितैस्तत्र पौरांगनानां लो
लापांगैर्यदि न रमसे लोचनैः वंचितोसि २८

द्वः तस्य विमुखो पराङ्मुखो मा स्म भूः मा भवेत्यर्थः स्मोत्तरे लङ् चेति चकारादाशीरर्थे लङ् न माङ्योग इति प्र
ङागमप्रतिषेधः तत्रोज्जयिन्यां विद्युद्दाम्नां तडिल्लतानां स्फुरितेभ्यः स्फुरणेभ्यः चकितैः भीतैः लो। १९
लापांगैः चंचलकटाक्षैः पौरांगनानां लोचनैः न रमसे यदि तर्हि वंचितः प्रतारितः स्याज्जन्मैव फलं भवेदित्यर्थः २८

विश्रांत इति विश्रांतः सन् तत्र नीचैर्गिरौ विनीताध्वश्रमः सन् अथ विश्रांतेरनंतरं वने अरण्ये या नद्यः तासां तीरेषु जा
नि स्वयं रूढानि अकृत्रिमाणि इत्यर्थः वननदीति पाठे तु पुमान् स्त्रियेत्येकशेषो द्वंद्वः उद्यानानामारामाणां संबंधी
नि यूथिकाजालकानि मागधीकुसुमसमुकुलानि अथ मागधी गणिका यूथिकांबष्ठेत्यमरः कोरकजालकमु
कुलकलिकाकुड्मलानि तुल्यानीति हलायुधः नवजलकणैः सिंचन् आर्द्रीकुर्वन् अत्र सिंचतेरार्द्रीकरणार्थत्वा
त् द्रवद्रव्यस्य करणत्वेन पयसा तृतीयेत्यर्थः तत्र द्रवद्रव्यस्य कर्मत्वे पयसा रेतःसिक्तकुमारीषु स्वयोनिषु तजास्व।
चतया स्तोकैर्निषिंचतमिवाम्बरं तत्वचीमेवमादि किरतीत्यादिनामपि रजः किरति मारुतः अवाकिरन्वयोवृद्धा
विश्रांतो यत्र व्रज वननदीतीरजातानि सिंचन्नुद्यानानां नवजलकणैर्यूथिकाजालकानि गंडस्वेदा
पनयनरुजाक्लांतकर्णोत्पलानां छायादानात्क्षणपरिचितः पुष्पलावीमुखानां २६ ॥
लीलाजैः पौरयोषित इत्यादि श्रेयर्थभेदा अथ गौरजः लाजादीनां कार्यत्वकारणत्वेन मथितव्येन तया गंडयोः कपोल
योः स्वेदस्य अपनयनेन प्रमार्जनेन या रुजा पीडा अभिघातादिवाद्रुङ्मसमयः तया क्लांतानि म्लानानि कर्णोत्पलानि येषां
तेषां पुष्पाणि लुनंतीति पुष्पलाव्यः स्त्रियः कर्मण्यण् टिड्ढाणञ् इत्यादिना ङीप् तासां मुखानि तेषां छायायाः
अनातपस्य दानात्कांतिदानेन च छायात्वनातपे कांतौ इत्यमरः कामुकदर्शनात्कामिनीनां मुखविका
शो भवतीति भावः क्षणपरिचितः क्षणं संस्पृष्टः सन् व्रज गच्छ २७ ॥

मे॰टी॰ निर्विंध्यां प्रस्थाय प्रवेणीवेणीभूतं वेणीभूतं वेणाकारं भूतं प्रतनु स्तोकं सलिलं यस्याः सा तथोक्ता वेणीभूतेति। 32
२ चकेशपाशोऽध्यस्यते रुहंतीतिरुहाः इगुपधलक्षणः कप्रत्ययः तटयोः रुहाः द्रुमाः ये तरवस्तेभ्यो भ्रंशंपतंतीति
तथोक्तैः जीर्णपर्णैः शुष्कपत्रैः पांडुच्छाया पांडुवर्णा प्रतनत्वेदेन सुभगविरहावस्थया एवंविधप्रकारेण व्यतीतस्य
एतावंतंकालमतीत्यगतस्य प्रोषितस्येत्यर्थः तेन तव सौभाग्यं सुभगत्वं हृदं भगासिद्धं तेषु र्वपदस्योभयपदवृ-
द्धिः व्यंजयंती प्रकाशयंती सा खलु सुभगोयंमेगतः कामयंत इति भावः सा पूर्वोक्ता सिंधुर्नदी निर्विंध्या हीन

वेणीभूतप्रतनुसलिलासावतीतस्य सिंधुः पांडुच्छायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः सौभा
ग्यंते सुभगविरहावस्थया व्यंजयंती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ३० ॥

यांनदे सिंधुर्दशाभेदे वृद्धयोगज इति विजयंती येन विधिना व्यापारेण कार्श्यं त्यजति स विधिः त्वयैवोपपाद्यः।
संपाद्यः कर्त्तव्य इत्यर्थः स विधिरेक एव हि इष्टसंयुक्तसंभोगः त्वदभावनिबंधनत्वात्कार्श्यमिति भावः इयं पंचमीम
दनावस्था उक्तं च रतिरहस्ये नयनप्रीतिः प्रथमं चित्तासंगस्ततोऽथ संकल्पः निद्राच्छेदस्तनुता विषयनिवृत्तिः त्र ७
पनाशः उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युः इति तामतीतस्येति पाठमाश्रित्य सिंधुर्नाम नद्यंतराभि
तिव्याख्यानं सिंधुर्नाम कश्चिन्नदविशेषः काश्मीरदेशस्थितः नदीत्वं तु व्यापिना ... पेतामाचक्ष्यते ३० ॥

संप्रति उज्जयिनीं गच्छतस्तस्य मध्येमार्गे निर्विंध्यायाः संबंधमाह वीचीति हे मेघ त्वं पथि उज्जयिनीपथि वीचिक्षोभेण।
तरंगचलनेन स्तनिता मुखरा विहगाः कर्णेरिकाः विहगानां हंसादीनां श्रेणिः पंक्तिरेव कांचिगुणो यस्याः तस्याः स्खलितेन
उपस्खलनेन मंदस्खलितेन च सुभगं यथा यात् तथा संसर्पंत्याः प्रवहंत्याः गच्छंत्याः स्वतया दर्शिता प्रकटिता आवर्तः
भ्रमः स एव नाभिर्यस्यास्तस्याः स्यादावर्तोंऽभसां भ्रमः इत्यमरः निःक्रांता विंध्यात् निर्विंध्या नाम नदी निरादयः।
क्रांताद्यर्थे पंचम्येति समासः द्विगुप्राप्तापन्नेत्यादिना परवल्लिंगताप्रतिषेधः तस्याः नद्याः संनिपत्य संगत्य रसा

वीचिक्षोभस्तनितविहगश्रेणिकांचीगुणायाः संसर्पंत्याः
स्खलितसुभगं दर्शितावर्तनाभेः निर्विंध्यायाः पथि भव रसाभ्यंतरः सं
निपत्य स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु २९ ।

जलमभ्यंतरे यस्य सः अन्यत्र रसेन शृंगारेणाभ्यंतरो भव अंतरंगो भव सर्वथा रसमनुभवेत्यर्थः शृंगारादौ जले
वीर्ये स्ववर्णे विषशुक्रयोः आस्वादे च रसं प्राहुरिति शाश्वतः ननु तत्प्रार्थनामंतरेण कथं तथानुभवो युज्यते।
इत्याह स्त्रीणामिति स्त्रीणां प्रियेषु विभ्रमो विलासः एव आद्यं प्रणयवचनं प्रार्थनावाक्यं हि स्त्रीणामेष स्वभावो
यद्विलासैरेवानुरागप्रकाशनं न तु कंठतः एवेति भावः विभ्रमस्यात्र नाभिसंदर्शनादिरूपत्वेति २९ ॥

मे॰ टी॰ १९

दीर्घीति यत्र विशालायां प्रत्यूषेषु प्रदम्युंविषु प्रत्यूषोहर्मुखेवमाविति विश्वः पटुप्रस्फुटं मदकलं मदेनाव्यक्तमधुरं ध्वनौ तु मधुरास्फुटे कलः इत्यमरः सारसानां पक्षिविशेषाणां सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः इति यादवः यद्वा सारसानां हंसानां च कोकः सारसो हंस इति शब्दार्णवे कूजितं रुतं दीर्घीकुर्वन् संभावयन्नित्यर्थः यावद्गतशब्दानु हृत्तिरिति भावः एतेन प्रियामाधुर्यस्य चाटुवाक्यानुसारि क्रीडापक्षिकूजितं दीर्घीकुर्वन्न विच्छिन्नं कुर्वन्निव गम्य ते स्फुटितानां विकासितानां कमलानामामोदेन परिमलेन मैत्र्या संसर्गेण कषायः सुरभिः रागद्रव्ये कषायो स्त्री निर्यासे सौरभे रसे इति यादवः अन्यत्र विमर्दगंधीत्यर्थः विमर्दोत्थे परिमलो गंधे जनमनोहरे आमोदः सोऽति

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः। यत्र स्त्रीणां
हरति सुरतग्लानिमंगानुकूलः सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ३२ ॥

निर्हारीत्यमरः अंगानुकूलः सौख्यान्मुखस्पर्शः अन्यत्र गात्रालिंगनेऽतनगात्रसंवादन इत्यर्थः भवभूतिनाप्युक्तं अशिथिलपरिरंभैदत्तसंवाहनानीति संवाह्यते चान्तिश्रान्ताः प्रियैः यतः कविरेव वक्ष्यति संभोगान्ते मम समुचि तो हस्तसंवाहनामिति सिप्रा नाम काचित्तन्नाम्नी नदी तस्या वातः सिप्रावातः सिप्राग्रहणं शैत्यद्योतनार्थं प्रार्थनासु रतयाच्ञासु चाटूनि करोतीति प्रार्थनाचाटुकारः पुनः सुरतार्थं प्रियवचनप्रयोक्तेत्यर्थः कर्माण्यणप्रियतमो वल्लभः इव स्त्रीणां सुरतग्लानिं पूर्ववत् खेदं हरति नुदति चाटूक्तिभिर्विस्मृत पूर्वावेशाः स्त्रियः प्रियतमप्रार्थनां सफलयन्ती ति भावः प्रार्थनाचाटुकारः खण्डितनायकानुनयेनेति व्याख्याने प्रियमाणे सुरतग्लानिदर्शनं न संभवति तस्मात्

कृते खण्डितेर्ष्याकषायितेनेति दशरूपके ३२ ॥

प्राप्येति विदंतीतिविदाः इगुपधलक्षणः कप्रत्ययः उदकसोष्ठानस्य विदाः कोविदाः उकारेलुप्तेष्टो दृष्टान्त्सा
पुः उदयनस्यवत्सराजस्यकथानां वासवदत्ताहरणादिघटितानामाख्यानानां कोविदास्तत्वज्ञाः ग्रामवृद्धायेषु तांस्तेषु
तानवंतीन्नामजनपदान्प्राप्यतत्र पूर्वोदिष्टां पूर्वोक्तां सौधोत्संगप्रणयविमुखो मास्मभूरुज्जयिन्या इत्युक्ता
मित्यर्थः श्रीविशालां संपद्युक्तां शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव हरिप्रिये इति शाश्वतः विशालां पुरीं उज्जयि
नीं विशालावोज्जयिनीस्यादमरः त्वं अनुसर व्रज कथंभूतामिवस्थितां सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे

प्राप्यावंतीनुदयनकथाकोविदग्रामवृद्धान्पूर्वोदिष्टामनुसर पुरीं श्रीविशालां विशालां स्वल्पी
भूते सुचरितफले स्वर्गिणां गां गतानां शेषैः पुण्यैर्हृतमिव दिवः कांतिमत्खंडमेकं ३२ ॥

स्वल्पीभूते सति अल्पावशिष्टे सति इत्यर्थः गां भूमिं गतानां गौरिलाकुंभिनीत्यमरः पुनरपि भूलोकमा
गतानामित्यर्थः स्वर्गिणां स्वर्गवतां जनानां शेषैर्भुक्तशेषैः पुण्यैः सुकृतैः हृतमानीतं स्वर्गार्थानुष्ठितकर्मशेषाणां स्व
र्गदानावश्यंभावादितिभावः कांतिरस्यास्तीति कांतिमत् उज्ज्वलं सारभूतमित्यर्थः एकं मुख्यादन्यत् एके मुख्यान्य
केवलाः इत्यमरः दिवः स्वर्गस्य खंडमिवस्थितामित्युत्प्रेक्षा एतेनातिक्रांतसकलभूलोकनगरसौभागसाररूप
मुज्जयिन्याख्यापते ३१ ॥

मे॰टी॰ प्रद्योतस्येति अत्र प्रदेशे वत्सराजो वत्सप्रदेशाधीश्वरः उदयनः प्रद्योतस्य तन्नाम्नः उज्जयिनीनायकस्य राज्ञः 36

१९ प्रियदुहितरं वासवदत्तां जह्रे जहार अत्रैव स्थले तस्यैव राज्ञः प्रद्योतस्यैव हैमं सौवर्णं तालद्रुमवनमभूत् अत्र ।
नलगिरिर्नामेन्द्रदत्तस्तदीयो गजो दर्पान्मदात् स्तंभमालानमुत्पाट्य उद्धृत्य उद्भ्रान्तोऽत्यन्तभ्रमं प्राकृतवानिति ।

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैं-
मं तालद्रुमवनमभूदत्र तस्यैव राज्ञः अत्रो-
द्भ्रान्तः किल नलगिरिः स्तंभमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ३४

तिह्यभूताभिः कथाभिरित्यर्थः अभिज्ञः पूर्वोक्तकथाकोविदो जन आगन्तून् देशान्तरादागतान् मित्रानगामी-
त्यादिना उपगाटिकस्तेन प्रश्रयः बन्धून् यत्र विशालायां रमयति विनोदयति अत्र भाविकालंकारः तडकं प्रतीता । १९
नागतं यत्र अन्यत्त्वेन लसंते अत्यद्भुतार्थकथनाद्भाविकं तदुदाहृतमिति ३५ ॥

इतः परं प्रक्षिप्तमपि श्लोकत्रयं व्याख्यायते हारानिति यस्यां विशालायां कोटिशो विपणिषु पण्यवीथिकासु रचि तान् प्रापितान् विपणिः पण्यवीथिकेत्यमरः इदं च विशेषणं यथालिंगं सर्वत्र संबध्यते तारान् शुद्धान् तारो मुक्ता दिसंशुद्धौ तरले शुद्धमौक्तिके इत्यमरः तरलगुटिकान् मध्यमणीभूतमहारत्नान् तरलो हारमध्यग इत्यमरः पिंडे मणौ महारत्ने गुटिका वटु पारद इति शाश्वतः हारान् मुक्तावलीः तथा कोटिशो नेकशः शंखाश्च शुक्तयश्च मुक्ता

हारांस्तारांस्तरलगुटिकान् कोटिशः शंखशुक्तीः शष्पश्यामान् मरक
तमणीनुन्मयूखप्ररोहान् दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च
भंगान् संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ३३ ॥

स्फोटाश्च शंखशुक्तीः मुक्तास्फोटाः स्त्रियां शुक्तिः शंखः स्यात्कंबुरस्त्रियामित्यमरः शष्पं बालतृणं तद्वत् श्यामान् शष्पं बालतृणं घासो यवसं तृणमर्जुनमित्यमरः उन्मयूखप्ररोहान् उद्गतरश्म्यंकुरान् मरकतमणीन् गारुडरत्नानि तथा विद्रुमाणां भंगान् प्रवालखंडांश्च दृष्ट्वा सलिलनिधयः समुद्राः तोयमात्रमवशेषो येषां ते तथोक्ताः संलक्ष्यन्ते तेन यानुमीयत इत्यर्थः रत्नाकरादप्यतिरिच्यन्ते रत्नान्यस्यां पद्धिरिति भावः ३३ ॥

मे॰टी॰ २॰ जालोद्गीर्णैरिति जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः जालं गवाक्षआनाये जालके कपटे गणे इति यादवः केशसंस्कारधूपैः वनिताकेशवासनार्थैः गंधद्रव्यधूपैरित्यर्थः अत्र संस्कारधूपयोस्तादर्थ्येपि यूपदार्वादिवत्प्रकृतिविकारत्वाभावात् अश्वघासादिवत्षष्ठीसमासेन चतुर्थीसमासः उपचितवपुः परिपुष्टशरीरः वंधोर्वंधुरिति वा प्रीत्या वंधुप्रीत्या भवनशिखिभिः गृहमयूरैः दत्तो नृत्यमेवोपहारः उपायनं यस्मै तथोक्तः उपायनमुपग्रा 38

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैर्वंधुप्रीत्या भवनशिखिभिर्द
त्तनृत्योपहारः हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः लक्ष्मीं
पश्यन् ललितवनितापादरागांकितेषु ३९ ॥

ह्यमुपहारस्तथोपदेत्यमरः कुसुमैः सुरभिषु सुगंधिषु ललितवनिताः सुंदरस्त्रियः ललितं त्रिषु सुंदरमित्यमरः तासां पादरागेण लाक्षारसेनांकितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु अस्याः उज्जयिन्याः लक्ष्मीं पश्यन् अध्वनाध्वगमनेन खेदमध्वखेदं नयेथाः अपनय ३९ ॥ २॰

यत्रेति यत्र विशालायां वप्राः हृद्याः यत्र श्यामाः पलाशवर्णा अत एव दिनकरहयस्पर्द्धिनवाजिनो वेगतश्च सूर्याश्व
कल्पाः तथा शैलोदग्राः शैलवदुन्नताः करिणः प्रभेदात् मदस्रावाद्धेतोः त्वमिव वृष्टिमंतः अग्रेनयंतीति अग्रण्यः
सन्नद्धाः ईशमादिना क्षिपु अग्रयग्रयामाभ्योनयतेर्णिवक्रमः इति णत्वे योधाग्रण्यो भटश्रेष्ठाः संयुगे युद्धे प्रतिदशमु

यत्र श्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः शै
लोदग्रास्त्वमिव करिणो वृष्टिमंतः प्रभेदात्
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्राप्तादित्याभरणरुचयः चंद्रहासव्रणांकाः ३५

खमभिगतवंतस्तस्थिवांसः स्थितवंतः अत एव चंद्रहासव्रणांकाः रावणासिदितानेव चिह्नानि तैः चंद्रहासेन रा।
वणासिमात्रेपि चक्रुविदिति शास्त्रतः प्राप्तादित्याभरणरुचयः प्रतिषिद्धभूषणाकांतयः शस्त्रप्रहारा एव।
वीराणामाभरणमिति भावः अत्रापि भाविकालंकारः लक्षणं तूक्तं ३५ ॥

मे॰टी॰ अपीति हे जलधर महाकालं नाम पूर्वोक्तं चंडीश्वरस्थानं अन्यस्मिन् संध्यातिरिक्तेपि काले आसाद्य प्राप्य ते तव
२१ स्थातव्यं अवस्थेयमित्यर्थः कृत्यानां कर्तरि वेति षष्ठी यावत् यावता कालेन भानुः सूर्यो नयनविषयं दृष्टि
पथमत्येति अतिक्रमति अस्तमुपैति तावत्स्थातव्यमित्यर्थः यावदव्यय यावधारणार्थे यावत्तावच्च साकल्येऽव

अप्यन्यस्मिन्नलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः कु
र्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया
मामंद्राणां फलमविकलं लप्स्यसे गर्जितानाम्
३८ ॥

धौ मानेऽवधारणे इत्यमरः किमर्थमत आह कुर्वन्निति श्लाघनीयां प्रशस्यां शूलिनः शिवस्य संध्यायां बलिः
पूजा तत्र पटहतां कुर्वन् संपादयन् आमंद्राणां ईषद्गंभीराणां गर्जितानां अविकलं अखंडं फलं लप्स्यसे प्रा २१
प्स्यसि लभे कर्तरि लृट् महाकालनाथबलिपटहत्वेन विनियोगात्ते गर्जितसाफल्यं स्यादित्यर्थः ३८ ॥

४०

भर्तुरिति भर्तुः स्वामिनो नीलकंठस्य भगवतः कंठस्येव छविर्यस्यासौ कंठच्छविरिति हेतोर्गणैः प्रमथैः गणास्तु ग-
णनायकस्याद्गणेशे प्रमथे च यदुक्तिः शब्दार्णवे सादरं यथा तथा वीक्ष्यमाणाः सन्तु प्रियवस्तुसादृश्यादतिप्रियत्वे भ-
वेदिति भावः त्रयाणां भुवनानां समाहारस्त्रिभुवनं तद्धितार्थेत्यादिना समासः पात्रादिभ्यः प्रतिषेधो वक्तव्यः।
इति वक्तव्यात् स्त्रीलिंगताप्रतिषेधः त्रिभुवनस्य गुरोस्त्रैलोक्यनाथस्य चंडीश्वरस्य कात्यायिनीवल्लभस्य पुण्यं।
पावनं धाम महाकालाख्यं तत्त्वं स्थानं पापाः गत्वा विशुध्येः अर्थे लिङ् श्रेयस्करत्वात् सर्वथा गंतव्यमिति भावः उक्तं च

भर्तुः कंठच्छविरिति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चंडीश्वरस्य धूतो
द्यानं कुवलयरजोगंधिभिर्गंधवत्याः तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ३२ ॥

स्कंदे श्रीकाशीतारकालिंगं पाताले हाटकेश्वरं मर्त्यलोके महाकालं दृष्ट्वा काममितमाप्नुयादिति न केवलं मुक्ति-
स्थानं किं तु विलासस्थानमपीत्याह धूतेति कुवलयरजोगंधिभिः उत्पलपरागगंधवद्भिः तोयक्रीडासु निरता-
नामासक्तानां युवतीनां स्नाने स्नानीयं चंदनादिकरणोल्बट्स्नानीयैः अभिषवे स्नानमिति यादवः तेन तिक्तैः सुगं-
धिभिः कटुतिक्तकषायास्तु सौगंध्ये प्रकीर्तिता इति हलायुधः सौगंध्यातिशयार्थं विशेषणद्वयं गंधवत्या
नाम नद्यास्तत्रत्याया मरुद्भिर्मारुतैः धूतोद्यानं केऽपि नाक्रीडमिति पाठो विशेषणम् ३२ ॥

मे॰ टी॰
२२

पश्चादिति पश्चात्संध्यावसानेनंतरं पशुपतेः शिवस्य नृत्यारंभे तांडवप्रारंभे प्रतिनवजपापुष्परक्ते प्रत्यग्रजपाकुसुमा
रुणे संध्यायां भवं सांध्यं तेजो दधानः उच्चैरुन्नतेन भुजापवनेन वोस्तेषां वने मंडले मंडलेन मंडलाकारेणाभिलीनः अभि
व्याप्तः सन्नुकर्त्तेरिक्त भवोत्माः भवपत्न्याः इंद्रवरुणभवशर्वेत्यादिना ङीपुष्प्रागुगागमश्च शांतोद्वेगो गजाजनदर्शी
नभयं यपोस्ते प्रनयवत्ति मितेनिश्चलेनयने यस्मिन्कर्माणि तन्नयोर्नेउद्वेगा स्वरिते कलेशो भये मे यरागाभिनी
ति शास्त्राणि वेभक्ति पूर्वेषु रागाः भावार्थे क्तिन् दृष्टभक्तिर्यस्य स दृष्टभक्तिः सन्नुपशुपतेरार्द्रं शोणितार्द्रं यन्नागा
जिनं गजचर्म अजिनं चर्मकृत्तिः स्त्रीसमरः तेषच्छादनानिवर्त्तयत्वमेव तन्नृत्याने भवेत्यर्थः गजासुरमर्दनानंतरं भग

पश्चादुच्चैर्भुजतरुवनं मंडलेनाभिलीनः सांध्यं तेजो विकसितजपापुष्परक्तं दधानः नृत्यारं
भे हर पशुपतेरार्द्रनागाजिनेच्छां शांतोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्याः ४॰ ॥

वान्मस्तदेवस्तदीयमार्द्रगजाजिनं भुजमंडलेन बिभ्रतांडवं चकारेति प्रसिद्धिः दृष्टभक्तिरिति कथं रूपसिद्धिः दृष्ट
शब्दस्य प्रियांवदित्यादिना पुंवद्भावस्य दुर्वारत्वात् अप्रियादिषु इति निषेधात् भक्तिशब्दस्य प्रियादिषु पाठादिति
तदेतच्चापरदृष्टभक्तिमाश्रित्य प्रतिविहितगणव्याख्यानेदृष्टभक्तिरस्येति नपुंसकपूर्वपदः अत्राहृतिमात्रप
रत्वे दृष्टशब्दाल्लिंगविशेषस्यानुपकारित्वात्तद्दीनत्वमेव विवक्षितमिति भावः भोजराजस्तु भक्तौ च धर्मसाधना
यामित्यनेन सूत्रेण भज्यते सेव्यत इति कर्मार्थत्वे भवानीभक्तिरित्यादि भवति भवसाधनायां तु स्थिरभक्तिर्भ

पादन्यासैरिति तत्र संध्याकाले पादन्यासैर्न्यासांगैः क्वणिताः रसना मेखला यासां तास्तथोक्ताः क्वणितरकमक
वाहस्तयोः कंकणेत्यादिनाकर्तृरिक्तः लीलया विलासेनावधूतैः कंपितैः रत्नानां केकाणमणीनां छायया कांत्या
खचिताः खचिता वलयश्चामरदंडा येषां तैः वलिश्चामरदंडे च जरा विस्मय चर्मणीति विश्वः चामरैर्वालव्यजनैः क्लां
तहस्ताः एतेन देशिकेन तत्सम्भवितेन तडकेन समर्वसेवङ्ककेडकवस्थादिदंडिका चामरस्वजः वीणांघूर्णवातयाकृष्ट

पादन्यासक्वणितरसनास्तत्र लीलावधूतैः रत्नच्छायाखचितवलिभि
श्चामरैः क्लांतहस्ताः वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रविंदू ना
मोक्ष्यंते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ३५ ॥

न्यस्तं देशिकं भवेदिति वेश्याः महाकालनाथस्वेपस्य नृत्यतो गणिकास्त्वत्तो नखपदेषु नखक्षतेषु सुखा
न्सुखकरान्सुखदेनो सुखमिति शाङ्गाणि वर्षस्याग्रविंदून्प्राप्य त्वयि मधुकरश्रेणिदीर्घान्कटा
क्षानपांगानामोक्ष्यंते पौरूपक्रमाः संतः सद्यः प्रत्युपकुर्वंतीति भावः कामिनी दर्शनीयत्वलक्षणं आशीर्वाप
सनफलं सद्यः लप्स्यसीति भावः ३५ ॥

मे॰ टी॰ २२ तामिति चिरंविलसनात्स्फुरणात्चखिन्नंविद्युदेवकलत्रंयस्यसभवान्सुप्ताःपारावताःकलरवाःयस्यांतस्यां। 44
विविक्तायामित्यर्थः पारावतःकलरवःकपोतइत्यमरः जनसंचाररहितायांसंभावितप्रवेशेतिभावः कस्यांचिद्भव
नस्यवलभावाच्छादनेउपरिभागइत्यर्थः आच्छादनेस्याद्वलभिर्गृहाणामितियादवः तांरात्रिंनीत्वादृष्टेसूर्येउ।
दितेसतीत्यर्थः पुनरपिअध्वशेषंवाहयेत्गमयेत् तथाहिसुहृदांमित्राणामभ्युपेताअंगीकृताअर्थस्यप्रयो।

तांकस्यांचिद्भवनवलभौसुप्तपारावतायांनीत्वारात्रिंचि
रविलसनात्खिन्नविद्युत्कलत्रः दृष्टेसूर्येपुनरपिभवा
न्वाहयेदध्वशेषंमंदायंतेनखलुसुहृदामभ्युपेतार्थकृत्याः
४२ ॥

जनस्यकृत्याक्रियायैस्तेअभ्युपेतसुहृदर्थाइत्यर्थः साधेलत्वविगमकत्वात्समासः कृत्याक्रियादेवतयोःका। २२
र्येस्त्रीकृप्यितेत्रिष्वितियादवः कृत्यः शत्रुचेतिचकारात्कृप्यु नमंदायंतेखलुनमंदाभवंतिखलुनविलंबितइत्य
र्थः लोहितादिडाज्भ्यः क्यषितिक्यष्वाक्यषश्यात्मनेपदं ४२ ॥

इत्थं महाकालनाथस्य नाम्नो भेवाप्रकारमभिधाय पुनरपि नगरसंचारप्रकारमाह गछंतीनामिति तत्रोज्जयिन्यां न
क्तं रात्रौ रमणवसतिं प्रियभवनं प्रति गछंतीनां योषितामभिसारिकाणामित्यर्थः सूचिभिर्भेद्यैरतिसांद्रैरित्यर्थः
तमोभिः रुद्धालोके निरुद्धदृष्टिप्रसारे नरपतिपथे राजमार्गे कनकस्य निकषो निकष्यत इति कषणस्थानिकषोप
लगता रेखा तद्वत् स्निग्धया तेजोमयस्यास्तस्याः स्निग्धतमस्फुरणसांद्रप्रेमेत्यादिवत् तेजसीति शाश्वतः विस्फुरदाम्नाग्रदि।
णाप्रकाशिका सौदामिनी विद्युत तेन प्रकाशिकया क्षणया तयात्वमुर्वीं मार्गं दर्शय किं विना तोयोत्सर्गस्तनिताभ्यां हि।

गछंतीनां रमणवसतिं योषितां तत्र नक्तं रुद्धालोके नरपति
पथे सूचिभिद्यैस्तमोभिः सौदामिन्या कनकनिकषस्निग्धया
दर्शयोर्वीं तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः

३८॥ योषितो विक्लवा भीरवः ततो वृष्टिगर्जितेन कातर्या
दिगर्जिताभ्यां मुखरः शब्दायमानश्च मा स्म भूः ऊनस्ता
इत्यर्थः नात्र तोयोत्सर्गसहितं स्तनितमिति विग्रहः विशिष्टस्यैव केवलस्तनितस्याप्यनिष्टत्वात् न च द्वंद्वपदे
प्रत्याचतरं पूर्वमिति शास्त्रविरोधात् लक्षणहेत्वोः क्रियाया इत्यत्र सूत्रपदवद्विपरीतनिर्देशेन पूर्वनिपातशा
स्त्रस्यानित्यत्वज्ञापकादिति ३८॥

गंभीरायाः गंभीरायाः नामसरितः उदास्नायकाचेतिध्वन्यते प्रसन्नेकलाहोषरहिते चेतसीव प्रसन्ने निर्मले
पयसि प्रकृत्या स्वभावेन सुभगः सुंदरः सुंदरोऽधिकभाग्यश्च दुर्दिनेन तवासौ उदीच्याशोभामितिच सुभगइति
शब्दार्णवेतेनवच्छायासावात्मासोपिप्रतिबिंबशरीरंवाप्रवेशंलप्स्यते अपिशब्दात्प्रवेशमनिच्छोरपीतिभावः
तस्माच्छायाद्वारापिप्रवेशावश्यंभावित्वात् अस्याः गंभीरायाः कुमुदवद्विशदानि धवलानि चटुलानि शीघ्रा

गंभीरायाः पयसिसरितश्चेतसीवप्रसन्ने छायात्मापिप्रकृतिसुभ
गोलप्स्यतेतेप्रवेशं तस्मादस्याः कुमुदविशदान्यर्हसित्वंनधैर्या
न्मोघीकर्तुंचटुलशफरोद्वर्तनप्रेक्षितानि ४५ ॥

णिशफराणांमीनानांउद्वर्तनान्युल्लुंठितान्येवप्रेक्षितानि आलोकनानिवाच्यवच्चटुलेशीघ्रमितिविश्वः ॥
तावदेवगंभीरायाः अनुरागलिंगधैर्यात्तु दार्ढ्यान्मोघीकर्तुंविफलीकर्तुंत्वंनार्हसिनागरकाविप्रलब्धवत्स
र्यः धूर्तलक्षणात्किंमानिनिस्वदर्पितानामकमसाध्यंहृदयः अवोमरक्ताधूर्तोविमुंचति ४५ ॥ २५

तस्मिन्निति तस्मिन्काले पूर्वोक्ते सूर्योदयकाले प्रणयिभिः प्रियतमैः खंडितानां योषितां नायकाविशेषाणां ज्ञाने
न्यासंगविकृते खंडिते ईर्ष्याकषायेते तिदृशा रूपकेन नयनसलिलं शांतिं नेयं नेतव्यं नयतेर्द्विकर्मकः अतो हेतोर्भानो
र्वर्त्म मार्गमाशु शीघ्रं त्यज तस्य वरकोऽमामभूदिति भावः विपदे ग्रनिष्टमाह सोऽपि भानुर्नलान्यंबुजानि प्रमणसंतीति नलि
नी पद्मनी तस्याः संबुजे नं नलनातुरागिति के तनस्त्रियामिति शब्दार्णवे तस्याः स्वकांतायाः कमले कमलमेव वदनं तस्मा
त्प्रालेयं हिममेवास्रमश्रु हर्तुं शमयितुं प्रत्यावृत्तः प्रत्यागतः नलिन्याश्च भर्तुः भानोर्देशांतरे नलिन्यंतरगमना

तस्मिन्काले नयनसलिलं योषितां खंडितानां शांतिं नेयं प्रणयिभि
रतो वर्त्म भानोस्त्यजाशु प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ४३ ॥

त्खंडितत्वमित्याशयः नो चेत्त्वयि मेघे करान् रुणद्धीति कररुत्तस्मिन् कररुधि सति दत्तसेयमिस
तीति गम्यते बलिहस्तांशवः करा इत्यमरः अनल्पाभ्यसूयोऽधिकरोषविशेषः स्यात् प्रायणोच्छाविघातात्तरोष
विशेषस्सकामिनामिति भावः त्राप्सरीणां चार्कमीशाने विस्त्ववाहेष्टियो नरः श्रेयो मितमनश्च पंति रोषं च भवेत्
ध्रुवमिति निषेधात्कार्यहानिर्भविष्यतीति ध्वनिः ४३ ॥

मे॰ टी॰ विरिति त्वन्निस्यंदेनन वर्षेणोच्छ्वसिताया उपबृंहितायाः वसुधाया भूमेर्गंधसंपर्केण रम्यः सुरभिरित्यर्थः स्रो। 48
२५ तः शब्देनेंद्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते स्रोतोंबुवेगेंद्रिययोरित्यमरः स्रोतोरंध्रेषु नासारंध्रेषु ध्वनितं ध्व
नितं शब्दस्तेन सुभगं यथा तथा दंतिभिर्गजैः पीयमानो वसुधागंधलोभादाघ्रायमाण इत्यर्थः अनेन मांद्यमुच्य
ते काननेषूडुंबराणां जंतुफलानामुडुंबरो जंतुफलो यज्ञांगो हेमदुग्धक इत्यमरः परिणमयिता परिपाक
यिता मितोष्णस्य तिष्णसः शीतो वायुः देवपूर्वं देवशब्दपूर्वं गिरिमित्यर्थः उपजिगमिषोरुपगंतुमिच्छोः गमेः

त्वन्निस्यंदोच्छ्वसितवसुधागंधसंपर्करम्यः स्रोतोरंध्रध्वनित
सुभगं दंतिभिः पीयमानः नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गि
रिं ते शीतो वायुः परिणमयिता काननोडुंबराणां ४९ ॥

सनंताड प्रत्ययः तेन वनीचैः शनैः वास्यति वांछ जनयिष्यतीत्यर्थः संबंधमात्रविवक्षायां षष्ठी देवपूर्वं गिरिमि
त्यत्र देवपूर्वत्वं गिरिशब्दस्यनत्वसंज्ञिनस्तदर्थस्येति संज्ञायां संनिगतत्वाभावादवाच्यवचनदोषमाहुः आ २५
लंकारिकाः तदुक्तं मेकावल्यां यदवाच्यस्य वचनमवाच्यवचनं ग्रथितमिति समाधानं तु देवशब्दविशे
षणेन गिरिशब्देन शब्दपरेणामेवागमेन तयोरपि देवगिरिर्लक्ष्यते इति कथंचित्समाधेयं ४९ ॥

तस्या इति हे सखे प्राप्तवानीरशाखां वेतसशाखां येन तत्तथोक्तं अत एव किंचिदीषत्करधृतं हस्तावलंबितमिव स्थि
तं मुक्तरोधोनितंबं रोध एव नितंबो कटिभागो येन तत्तथोक्तं नितंबः पश्चिमे श्रोणिभागे स्त्रीकटके कटाविति या
दवः नीलं कृष्णवर्णं तस्याः गंभीरायाः सलिलमेव वसनं नीलवस्त्रधारणं विरहितापतिवारणं इति प्रसिद्धिः हृत्वा

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितंबं प्र
स्थानं ते कथमपि सखे लंबमानस्य भावि ज्ञा
तास्वादो विवृतजघनां को विहातुं समर्थः ४५

पनीय लंबमानस्य पीतसलिलभारात् नम्रमाणस्य जघनात् दूरमपसृतस्य चेत्यन्यत्र तेन तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण
भावि कृच्छ्रे हेतुमाह ज्ञातेति ज्ञाता आस्वादो येन सः कः पुमान् विवृतं प्रकटितं जघनं कटिस्तत्पूर्वभागो वा यस्या
स्तां जघनं स्यात्कटेः पूर्वश्रोणीभागात्परोभागोऽपीति यादवः विहातुं कः समर्थः न कोऽपि इत्यर्थः ४५ ॥

मे.टी.
२९

ज्योतिरिति ज्योतिषस्तेजसो लेखा राजयस्तासां वलयं मंडलमस्यास्तीति ज्योतिर्लेखावलयि गलितं भ्रष्टं न त्वलो-
त्पाद्य छिन्नमित्याशयः यस्य मयूरस्य बर्हं पिच्छं पिच्छबर्हे नपुंसके इत्यमरः भवानी गौरी पुत्रप्रेम्णा पुत्रस्ने-
हेन कुवलयस्य दले यत्र तत्प्रापि तत्रैव योगि यथा तथा कर्णे करोति दलेन सह धारयतीत्यर्थः यद्वा दलप्रापि दल-
भाजि दलार्हे कर्णे करोति क्विबंतात्सप्तमी दले परिहृत्य तत्स्थाने कर्णे बर्हं धत्त इत्यर्थः नायस्तु कुवलयदलदे-
पीयदति हेयो नितरां पद्मरागाचेनितद्धरशशिरुचा हरशिरश्चंद्रिकया धौतापांगं स्वनेत्रापि शोभमादतिधवलितं।

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति धौ-
तापांगं हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ४८ ॥

नेत्रांतेऽपांगौ नेत्रयोरंतावित्यमरः पावकस्याग्नेरपत्यं पावकिः अत इञ् इतीञ्प्रत्ययं तस्य पावकेः स्कंदस्य तं
पूर्वोक्तं मयूरं पश्चात्पुष्पाभिषेचनानंतरं अद्रेर्देवगिरेः कन्दरग्रहणेन गुहासंक्रमेण गुरुभिः प्रतिध्वानमहद्भिः ग-
र्जितैर्नर्तयेथाः नृत्यं कारय मार्दंगिकभावेन भगवंतं कुमारमुपास्स्वेति भावः नर्तयेथा इत्यत्र णावकर्मका- २९
च्चित्तवत्कर्तृकादित्यात्मनेपदापवादः निगरणचलनार्थेभ्यश्चेति परस्मैपदं न संभवति न पादम्याङ्यमाङ्यस-
परिमुहरुचिनृतिवदवस इति प्रतिषेधात् ४८ ॥

तत्रेति तत्रदेवगिरौ नियतावसतिर्यस्य तेन नियतस्त्विदित्थमित्यर्थः पुराकिल तारकाख्यासुरविजयाय संरक्षः स्वाया
र्थेनावशाङ्कवान् भवानीनंदनः स्कंदो नित्यमहमिह शिवाभ्यां सह वसामीत्युक्तवान् तस्मात्तत्र वसतीति प्रसिद्धिः
स्कंदः कुमारस्वामिने पुष्पाणां मेघः पुष्पमेघः पुष्पमेघीकृतात्मा कामरूपत्वात्पुष्पवर्षकमेघीकृतविग्रहः सन्व्यो
मगंगाजलार्द्रैः पुष्पासारैः धारासंपातैः धारासंपात आसार इत्यमरः भवान्स्वयमेव स्नपयतु अभिषिंचतु स्वयंप्र।
जापाउत्तमवादितिभावः तथाव शंभुरहस्ये स्वयं यजति चेद्देवमुत्तमा सोदरात्मजैः मध्यमा याजयेद्भृत्यैरधमाया
जनक्रियेति स्कंदस्य स्नपनसमर्थकमर्थांतरं न्यस्यति रक्षेति तत भगवान् स्कंद इत्यर्थः विधेयप्राधान्यान्नपुंसकत्व

तत्र स्कंदं नियतवसतिं पुष्पमेघीकृतात्मा पुष्पासारैस्स्नपयतु भवान्व्योमगंगाजलार्द्रैः रक्षाहे
तोर्नवशशिभृता वासवीनां चमूनां अत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ४० ॥

निर्देशः वासवस्येमा वासव्यः तस्येदमित्यणता सं वासवीनामैन्द्रीणां चमूनां सेनानां रक्षेव हेतुस्तस्य रक्षाहेतोः रक्षण
करणार्थमित्यर्थः षष्ठीहेतुप्रयोगे इति षष्ठी नवशशिभृता चंद्रशेखरेण वहतीति वहः पचाद्यच् हुतस्य वहो
हुतवहो वह्निस्तस्य मुखे संभृतं संचितं आदित्यमतिक्रांतमत्यादित्यं अत्यादयः क्रांताद्यर्थे द्वितीययेति समासः तेजोदि
मात्ताङ्गभवतो द्रासैतन्मूर्त्यंतरमित्यर्थः अतः पूज्य इति भावः मुखग्रहणात् शुद्धत्वसूचनार्थं तदुक्तं शंभुरहस्ये गवा।
पश्चाद्विजस्याग्निर्योगिनो हृद्यद्रूपे वर्वचः परं गुप्तमेवित्यान्मुखं वह्नीवद्दिवाजिनामिति ४० ॥

मे॰टी॰ त्वयीति शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेश्चौरे तत्तुल्यवर्ण इत्यर्थः त्वयि जलमादातुमवनते सति पृथुमपि दूरभा 52
२७ वात् दूरत्वात्तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिंधोः चर्मण्वत्याख्यायाः प्रवाहं गगने गतिर्येषां ते गगनगतयः
खेचराः सिद्धगंधर्वादयः प्रथममपि बहुव्रीहिः पूर्वजन्मा युक्तरपदो द्रष्टव्यः नूनं सत्यं दृष्टीः आवर्ज्य आनम्य एका

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिंधोः पृथुमपि तनुं दूरभावात्प्रवाहं
प्रेक्षिष्यंते गगनगतयो नूनमावर्ज्य दृष्टीर्
एकं मुक्तागुणमिव भुवः स्थूलमध्येंद्रनीलं

५०

मेकयष्टिकं स्थूलो महान् मध्यो मध्यमणिभूत इंद्रनीलो यस्य तं भुवो भूमेर्मुक्तागुणं मुक्ताहारमिव प्रेक्षिष्यंते अ॰ २
त्र तेन नीलमेघसंगतस्य प्रवाहस्य भूकंठगतमुक्तागुणत्वेनोत्प्रेक्षणादुत्प्रेक्षेयमिति इवशब्देन व्यज्यते निरू
पकालंकारस्तत्रोपमायामिव शब्ददर्शनात्राप्युपमैवेति विभ्रमः ५० ॥

आराध्येति एवं पूर्वोक्तप्रकारेणाराधनात्तृणानि शरो वाणस्तृणं वाणा इति शब्दार्णवे तेषां वनं शरवणं प्रतीतः शा
रेत्विस्यादिना णत्वं तत्र भवोपन्नः यस्मात् शरवणभवं देवं स्कंदं शरजन्मा षडाननस्त्वमरः अवर्मो बहुव्रीहिस्यार्थिकरा
णाय नमायुत्तरपदस्येति वामनः अगतिगतादाश्रयणीयस्त्वर्थः आराध्योपास्य वीणाभिः वीणावद्भिः व्रीह्यादित्वा
दिनिप्रत्ययः सिद्धद्वंद्वैः सिद्धमिथुनैः भगवंतं स्कंदमुपवीणयितुमागतैरिति भावः जलभयात् जलसेवकस्य वी
णाक्वणनप्रतिबंधकत्वादिति भावः मुक्तमार्गस्त्यक्तवर्त्मा सन् उल्लंघिताध्वा किंचितमध्वानं गतस्त्वमर्थः सुरभि

आराध्यैवं शरवणभवं देवमुल्लंघिताध्वा सिद्धद्वंद्वैर्जलकण
भयाद्वीणिभिर्मुक्तमार्गः व्यालंबेथाः सुरभितनयालंभजां
मानयिष्यन् स्रोतोमूर्त्या भुवि परिणतां रंतिदेवस्य कीर्तिम्

४५ ॥

तनयानां गवां आलंभेन संज्ञपनेन जातां तनयोक्तो भुवि लोके स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रूप
विशेषमापन्नां रंतिदेवस्य दशपुरपतेर्महाराजस्य कीर्तिं चर्मण्वत्याख्यां नदीमित्यर्थः मानयिष्यन् सत्कार
यिष्यन् व्यालंबेथाः आलंबावतरेरित्यर्थः पुराकिल राज्ञो रंतिदेवस्य गवालंभेष्वेकत्र संभृतादसृङ्निःस्यंदात्
चर्मराशेः काचिन्नदी सस्यंदे सा चर्मण्वतीत्याख्यायते ४५ ॥

मे॰टी॰ ब्रह्मावर्त्तमिति अत्रमनुः सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तद्देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षत इति अथानंत। 54
२८ रं ब्रह्मावर्त्तनामजनपदं देशं छायया अनातपमंडलेन गाहमानः प्रविशन् तत्स्वस्वरूपेण पीठत्वेनाश्रमादी
नि परिहृत्यान्यतो व्रजेदिति वचनादिति भावः तत्र प्रधनपिशुनं अथापि शिरःकपालादिमत्तया कुरुपांडवा।
युद्धसूचकमित्यर्थः युद्धमायोधनं जन्यं प्रधनं प्रविदारणमित्यमरः तत्प्रसिद्धं कुरूणामिदं कौरवं क्षेत्रं व्रजे

ब्रह्मावर्त्तं जनपदमथच्छायया गाहमानः क्षेत्रं तत्र प्रधनपिशु
नं कौरवं तद्भजेथाः राजन्यानां शितशरशतैर्यत्र गांडीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ५२ ॥

थाः कुरुक्षेत्रं व्रजेत्यर्थः यत्र कुरुक्षेत्रे गांडीवं धनुः विशेषः गां — जगत्संज्ञायामिति मत्वर्थीयो वप्रत्ययः अ।
र्जुनस्य तद्गांडीवं पुंनपुंसकमित्यमरः गांडीवमिति पवर्गीयमस्य गांडीवधन्वाऽर्जुनः वा संज्ञायामित्यनङादेशः।
शितशरशतैर्निशितबाणसहस्रैः राजन्यानां नृपाणां मुखानि धाराणामुदकधाराणां पातैः कमलानि त्वमिव। २८
अभ्यवर्षदभिमुखं वृष्टवान् शरवर्षेण शिरांसि विच्छेदेत्यर्थः ५२ ॥

तामिति तां चर्मण्वतीमुत्तीर्य भ्रुवोर्लतेव भ्रूलता उपमितिसमासः तासां विभ्रमा विलासाः परिचिता ल्कृमा
भ्रूलताविभ्रमा येषु तेषां पक्ष्माणि नेत्रलोमानि पक्ष्म सूत्रे च सूक्ष्मांशे किंजल्के नेत्रलोमनीति शाश्वतः तेषामुत्क्षे
पाउत्क्षमनात् हेतोः कृष्णाश्च ताः शाराश्च कृष्णशाराः नीलशबलाः वर्णो वर्णेन समासः कृष्णरक्तसितशार इतियादवः
ततः शारशब्दादेव सिद्धिः कार्ष्ण्यपुनः कृष्णशब्दोपादानेकार्ष्ण्यप्राधान्यार्थं रक्तत्वेन तत्प्रन विवक्षितमुपमानुसारा
त्तत्समस्तमाविकस्पष्टीनेत्रेषु सामुद्रिकविरोधादित्तरस्याप्रसंगात् कचित्सद्भावकथनेनतदुपात्तविषयं उपरिवि

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिवि
लसत्कृष्णशारप्रभाणां कुंदक्षेपानुगमधुकरश्रीमुषामात्मबिं
बं पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानां ५१ ॥

लसंत्यः कृष्णशाराः प्रभा येषां तेषां कुंदानि माघ्यकुसुमानि माघ्यं कुंदमित्यमरः तेषां क्षेपश्चलनं तस्यानु
गामनुसारिणो ये मधुकरास्तेषां श्रियं मुष्णंतीति तिनानितथोक्तानि तिप्पमाणकुंदानुविधायिमधुकरकल्पानामि
त्यर्थः दशपुरं रंतिदेवनगरं तत्रत्यवधूः स्त्रियः वधूर्जाया स्नुषा स्त्री चेत्यमरः तासां नेत्रकौतूहलानां नेत्राभिलाषाणामभा
भिलाषो दृष्टीनामित्यर्थः आत्मबिंबं स्वमूर्तिं पात्रीकुर्वन् विषयीकुर्वन्व्रज ५१ ॥

तस्मादिति तस्मात्सास्वतीप्रदेशात् कनखलस्याद्रेः समीपेऽनुकनखलं अव्ययीभावः शैलराजात् हिम
वतोऽवतीर्णां सगरतनयानां स्वर्गसोपानपंक्तिं स्वर्गप्राप्तिसाधनभूतामित्यर्थः जन्होर्नाम राज्ञः कन्यां जान्हवीं ग
च्छेर्गन्तव्य विध्यर्थे लिङ् या जान्हवी गौर्याः वक्रया भ्रुकुटिरचनया सापत्न्यरोषात् भंगकरणेन यः फेनैर्विहस्येव हसित

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जन्होः कन्यां सगरतनयस्वर्गसोपानपंक्तिं
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणमकरोदिंदुलग्नोर्मिहस्ता।
श्लो ५५

तेषां वलात्फेनानां हासत्वेनोत्प्रेक्षितत्वात् इंदोः शिरोमाणिक्यभूतेन लग्नाः ऊर्मय एव हस्ताः यस्याः सा इंदुलग्नोर्मिहस्ता
सती शंभोः केशग्रहणमकरोत् यथा काचित्प्रौढा नायिका सपत्नीमसहमाना भर्तारं सहशिरोरत्नेन केशे
ष्वाकर्षतीति तद्वदिति भावः इदं पुरा किल सभगीरथप्रार्थनया भगवतीं गगनपथात्पतंतीं गंगां गंगाधरो ज

हित्वेति वंधुप्रीत्या कुरुपांडवस्नेहेन नतुभयेन सम्मरविमुखो युद्धनिस्पृहः लांगलमस्यास्तीति लांगली हलध
रः अभिमतरसामभीष्टस्वादां तयारेवत्याः स्वप्रियायाः ककुद्मिकंन्यायाः लोचनेएवांकः प्रतिविंवितं चिह्नं य
स्यां तां हालां सुरां स्वभावात् हलिप्रियां हालेत्यमरः अभिप्रयुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमुष्य
नीवकविप्रयोगात्साभिप्रियदां हित्वा रवामनः हित्वा त्यक्त्वा डस्मज्ञामितिभावः याः सारस्वतीरपः सिषेवे सौम्य
सुभगत्वं तासां सारस्वतीनां सरस्वत्याः इमाः सारस्वत्यस्तासामपां सेवां कृत्वा अंतरं तरात्मनि शुद्धो निर्मलो नि

हित्वा हालामभिमतरसां रेवतीलोचनांकां वंधुप्रीत्या स
मरविमुखो लांगली याः सिषेवे कृत्वा तासामभिगममपां
सौम्य सारस्वतीनामंतःशुद्धस्त्वमपि भविता वर्णमात्रेण कृ
ष्णः ५३ ॥

र्दोषो भविता एकुलत्त्वावितिरच्चु असि सद्यएवशुद्धोभविष्यतीत्यर्थः वर्तमानसामीप्ये वर्त
मानवद्वेति वर्तमानप्रत्ययः वर्णमात्रेण वर्णेनैव कृष्णः श्यामः नतु पापेनेत्यर्थः अंतःशुद्धिरेव मुख्या ध्यानत्वा
त्ताः वह्निः शुद्धोपि सन्नवधप्रायश्चितार्थं सारस्वतसलिलसेवी तत्र भगवान् वलभद्र एव निदर्शनं अतो भवता
पि सारस्वतीनिषेवितव्येतिभावः ५३ ॥

मे॰टी॰ आसीनानामिति आसीनानांमुपविष्टानांमृगाणांकस्तूरिकामृगाणांअस्यानाभिगंधानुपतेर्नाभिगंधैःकस्तू 58
३॰ रिगंधैःतेषांतडङ्गवनात्स्रुतएवमृगनाभिसंज्ञाचमृगनाभिर्मृगनाभिर्मृगमदःकस्तूरीत्यमरः अथवाना।
मयःकस्तूर्यःनाभिप्रधानेकस्तूर्यःमदेऽपिक्कचिदीरितःइतिविश्वःतासांगंधैःसुरभितासुरभिकृताःशिलाः
यस्यतेनतस्यागंगायाएवप्रभवत्यस्मादितिप्रभवःकारणंतेनतुषारैःप्रालेयैःगौरंसितंअवदातःसितोगौरइत्य

आसीनानांसुरभितशिलंनाभिगंधैर्मृगाणां तस्याएवप्र
भवमचलंप्राप्यगौरंतुषारैः वक्ष्यस्यध्वश्रमविनयनेतस्य
शृंगेनिषण्णः शोभांशुभ्रांत्रिनयनवृषोत्खातपंकोपमेयां
५८ ॥

मरः अचलंविनियतेऽनेनेतिविनयनंकरणेल्युट्अध्वश्रमस्यविनयनेऽपनोदकेतस्यहिमाद्रेःशृंगेनिषण्णः
सन्शुभ्रोयस्त्रिनयनस्यत्र्यंबकस्यवृषोवृषभःसुकृतेवृषभेवृषइत्यमरःतेनोत्खातेनविदारितेनपंकेन
सदृशोपमेयामुपमातुमर्हांशोभांवक्ष्यसिवोढासिवहतेर्लृट् त्रिनयनेत्यत्रपूर्वपदात्संज्ञायामगइतिणत्वं। ३॰
नभवतित्वम्भादिषुचेतिनिषेधात्तस्याःप्रभवमित्यादिनाहिमाद्रेर्मेघस्यवैवाहिकोपदृष्टविदाराध्वन्यते ५९

तस्याइति सुरगजऐरावतइवव्योम्निपश्चार्धेपश्चिमार्द्धमित्यर्थःपृषोदरत्वात्साधुः तेनलंबितइतिपश्चार्धलंबी
सन्‌ पश्चार्धभागेनव्योम्निस्थित्वापूर्वार्द्धेनजलंपातुमुद्यतइत्यर्थः केचित्पूर्वार्द्धलंबीतिपाठंकल्पयंति अच्छस्फ।
टिकविशदंनिर्मलस्फटिकावदातंतस्यागंगायाः अंभस्तिर्यक्तिरश्चीनेयथातथात्वंतर्कयेर्विचारयेस्त्वं।

तस्याःपातुंसुरगजइवव्योम्निपूर्वार्द्धलंबी
त्वंचेदच्छस्फटिकविशदंतर्कयेस्तिर्यगंभः
संसर्पंत्यासपदिभवतःस्रोतसिछाययासौ
स्यादस्थानोपगतयमुनासंगमेवाभिरामा ५५

त्सपदिस्रोतसिप्रवाहेसंसर्पंत्यासंक्रमंत्याभवतःछाययाप्रतिबिंबेनासौगंगास्थानेप्रयागादन्यत्रोपगतः
प्राप्तोयमुनासंगमोययासातथाभूतेवाभिरामास्यात्‌ ५५ ॥

मे॰ टी॰ ३१

येइति तस्मिन्हिमाद्रौ संरंभः कोपः संरंभः संभ्रमे कोपे इति शब्दार्णवे तेनोत्पतनेन उत्प्लवने रभसो वेगो येषां
ते तथोक्ताः रभसो वेगहर्षयोरित्यमरः ये शरभाः अष्टपदमृगविशेषाः शरभः शलभे चाष्टपदे प्रोक्तो मृगान्तरइ
तिविश्वः मुक्ताः ध्वा शरभोत्पतनमार्गो येन तं भवंतं सपदि स्वांगभंगाय लंघयेयुः संभावनायां लिङ् भवतीति
दूरत्वात्स्वांगभंगातिरिक्तफलनास्ति लंघनेनास्य लंघनस्येत्यर्थः तान् शरभान् तुमुलान् संकुलाः करकाः वर्षोप
लस्तु करके त्यमरः तासां वृष्टिस्तस्याः पातेनावकीर्णान् विक्षिप्तान् कुर्वीथाः कुरुष्व विध्यर्थे लिङ् लड्वोप्यधिति
पन्नप्रतिपन्नः सन्यः प्रतिदेयमृ इतिभावः तथाहि आरभ्यत इत्यारंभाः कर्माणि तेषु ये प्रयत्नाः उद्योगाः संतिः फ

ये संरंभोत्पतनरभसाः स्वांगभंगाय तस्मिन् मुक्ताध्वानं सपदि शरभाः लंघयेयुर्भवंतं तान्कुर्वीथा
स्तुमुलकरकावृष्टिपातावकीर्णान् के वा न स्युः परिभवपदं निःफलारंभयत्नाः ५८ ॥

लौ येषां ते तथोक्ताः निःफलकर्मोपमा इत्यर्थः अतः के वा परिभवपदं तिरस्कारपदं न स्युः न भवंति भवंत्ये
वेत्यर्थः यदत्र च नोपलस्तु करक इति यादववचनात् करकशब्दस्य नियतपुंलिंगताभिप्रायेण करकाणामा
वृष्टिरिति केषांचिद्व्याख्यानं तदज्ञेनानुमंस्ते वर्षोपलस्तु करकेत्यमरवचनव्याख्याने क्षीरस्वामिना कमंडलौ
च करकः स्त्रगाने च विनायके इति नानार्थे पुंस्यपि वस्तीति वदता उभयलिंगताप्रकाशनात् यादवस्यतपुंलिं
गताविधाने तात्पर्यं न तु स्त्रीलिंगतानिषेधात् इति तद्विरोधोपि करकस्तु करभे स्यादाकोशे च कमंडलौ पतिभे

तमिति वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कंधप्रदेशविशेषाः अस्त्री प्रकांडः स्कंधः स्यान्मूला
च्छाखावधेस्तरोरित्यमरः तेषां संघट्टेन संघर्षेण जन्म यस्य स तथोक्तः जन्मोत्तरपदत्वाद्व्यधिकरणोपि बहु
व्रीहिः साधुरित्युक्तं उल्काभिः स्फुलिंगैः क्षपिता निर्दग्धाः चमरीणां वालभाराः केशसमूहा येन सः दवइत्यग्निः

तं चेद्वायौ सरति सरलस्कंधसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः
अर्हस्येनं शमयितुमलं वारिधारासहस्रै
रापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम्
५७ ॥

दवाग्निः वनवह्निः वने च वनवह्नौ दवो दाव इष्यत इति यादवः तं चेदिमाद्रिं बाधेत चेत्पीडयेद्यदि एनं दवा
ग्निं वारिधारासहस्रैः शमयितुमर्हसि युक्तं चैतदित्याह उत्तमानां महतां संपदः समृद्धयः आपन्नानामार्ता
नामार्तिप्रशमनमापत्तिनिवारणमेव फलं प्रयोजनं यासां तास्तथोक्ता हि अतो हिमाचलस्य दावानलस्त्वया शम
यितव्य इति भावः ५७ ॥

शब्दायंतइति हेमेघअनिलैः पूर्यमाणाः ध्मायमानाः कीचकाः वेणुविशेषाः वेणवः कीचकास्ते स्युर्ये स्वनंत्यनि-
लाहता इत्यमरः मधुरंश्रुतिमधुरंयथातथाशब्दायंतेशब्दंकुर्वंतिस्वनंतीत्यर्थः शब्दवैरकलहाभ्रकण्वमेघेभ्यः
करणे इतिक्यङ् अनेनवंशवाद्यसंपत्तिरुक्ता संशक्ताभिर्वंशवाद्यानुषक्ताभिर्वा संरक्ताभिरित्यर्थः किन्नरीभिः
किन्नरस्त्रीभिस्त्रयाणांसमाहारस्त्रिपुरंतद्धितार्थेत्यादिनासमाहारसमासः पात्रादित्वान्नपुंसकत्वंतस्यवि-

शब्दायंतेमधुरमनिलैःकीचकाःपूर्यमाणाः संसक्ताभिस्त्रि
पुरविजयोगीयतेकिन्नरीभिः निर्ह्रादोतेमुरजइवचेत्कंदरेषु
ध्वनिःस्यात् संगीतार्थोननुपशुपतेस्तत्रभावीसमग्रः ६० ॥

जयोगीयतेकंदरीषुदरीषुदरीतुकंदरोवास्त्रीत्यमरः तेतवनिर्ह्रादोमुरजइववाद्यभेदेध्वनिरितिमुरजध्वनिरि-
वेत्यर्थः स्याच्चेत्तर्हितत्रचरणसमीपेषुपशुपतेर्नित्यसन्निहितस्यशिवस्यतत्पतेश्रुतिशेषः सततंगीतंतौर्यत्रि-
कंसंगीतंसम्यक्गीतंनाट्यारंभप्रसिद्धकर्तव्याणांत्रितयेचेतिभावदाणावेनतद्वार्थः संगीतार्थः संगीतवस्तुअ-
र्थोऽभियेय अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषुइत्यमरः समग्रः संपूर्णोभावीननुभविष्यतिखलुभवि-

ध्वनि ३२ गमारशसमविधारवेक्रीतिः ६० ॥

तत्रेति तत्र हिमाद्रौ दृषदि कस्यांचिच्छिलायां व्यक्तं प्रकटं शश्वत्सदा सिद्धैर्योगिभिः सिद्धो निष्पन्नो योगो येषां त इति विश्व
उपचितवलिं परिचितपूजं वलिः पूजोपहारयोरिति यादवः अर्द्धश्चासाविन्दुश्चेत्यर्द्धेन्दुः खण्डचन्द्रः अर्द्धं खण्डे समेंऽशार्द्ध
मिति विश्वः भित्तं शकलखण्डे वा पुंस्यर्द्धोऽर्द्धं समेंऽशके इत्यमरः समौलो यस्य तस्यार्द्धेन्दुमौलेरीश्वरस्य चरणन्यासं भक्तिः
पूजाश्रवस्तु रागः तया नम्रः सन् परीयाः प्रदक्षिणीकुरु परिपूर्वादिणो यातेर्लिङ् यस्मिन्पादन्यासे दृष्टे सति उद्धूतपापाः
निरस्तसमस्तकल्मषाः सन्तः श्रद्दधानाः विश्वसन्तः पुरुषाः श्रद्धा विश्वासः स्यादास्तिक्यबुद्धिरिति यादवः श्रद्धतेरोरु

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः शश्वत्सिद्धैरुपचितवलिं भक्तिनम्रः परीयाः यस्मिन्
दृष्टे करणविगमादूर्द्धमुद्धूतपापाः कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ५५ ॥

पसर्गवद्वृत्तिर्वक्तव्येति अत एवोद्धूयाते शानच करणानां विगमात् ऊर्द्धं देहत्यागात्परमित्यर्थः करणं साधक
तमं देहे क्षेत्रगात्रेन्द्रियेष्वपि चेत्यमरः स्थिरं शाश्वतं यत् गणानां प्रमथानां पदं स्थानं गणाः प्रमथसंख्यौघा इति वैजयन्तीत।
स्य प्राप्तये कल्पिष्यन्ते प्राप्स्यन्तीत्यर्थः क्लृपेः पर्याप्तिवचनस्यालमर्थत्वात्तद्योगे नमःस्वस्तीत्यादिना चतुर्थी अल
मिति पर्याप्त्यर्थवचनग्रहणमिति भाष्यकारः अत्र केचिज्जयामास शिवः श्रीचरणद्वयं हिमाद्रौ शोभवादीनां सि
द्धये मवकर्माणि हस्यश्रीचरणां सम्यक् साधका स्थितये तं संख्यायेन शरीरादिविचारो वृगात्रपमिति शोभ्याद्रसे ५५

गत्वेति क्रौञ्चबिलगमनानन्तरं ऊर्ध्वं गत्वा दशमुखस्य रावणस्य भुजैरुच्छ्वासिताः विश्लेषिताः प्रस्थानां सानूनां सं
धयो यस्य तस्य पतेन नयनकौतकसम्भावरूढः त्रिदशपरिमाणमेषामिति त्रिदशाः संख्येयत्वादिना बहुव्रीहिः बहु
व्रीहौ संख्येये डच् बहुगणादित्यादिना समासान्तो जितितीरस्वामी त्रिदशानां देवानां वनितानां तासां दर्पणस्य स्फटिक

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः
शृंगोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खे
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ५८

वादुज्ज्वलत्वाद्वा बिंबग्राहित्वेनेदमुक्तं कैलासस्यातिथिः स्याः यः कैलासः कुमुदविशदैः शृंगाणामुच्छ्रायैरौ
न्नत्यैः खमाकाशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतस्त्र्यंबकस्य त्रिलोचनस्याट्टहासोऽतिशायितहासस्त ३३
था स्थितः अट्टहासवतिशयश्चैमावितियादवः यावत्पातालमनेनोन्नतादाशादीनां धावल्यकविसमयसिद्धं ५८ ॥

प्रालेयेति प्रालेयाद्रेर्हिमाद्रेरुपतटं तटसमीपे अव्ययं विभक्त्यादिना समीपार्थेऽव्ययीभावः तांस्तान् वीप्सायां द्वि
रुक्तिः विशेषान् द्रष्टव्यार्थान् विशेषान् वा यद्वा दृष्टश्रोतव्यवस्तूनीति शब्दार्णवे अतिक्रम्य दर्शयन्नतीत्येत्यर्थः गच्छेरित्यना
गतेन संबंधः हंसानां द्वारं हंसद्वारं मानसप्रस्थायिनो हंसाः क्रौंचरंध्रेण संचरंतीत्यागमः भृगुपतेर्जामदग्न्यस्य यशो
वर्त्म यशः प्रवृत्तिकारणमित्यर्थः यत् क्रौंचस्याद्रेः रंध्रमस्ति तेन क्रौंचबिलेन बलेर्दैत्यस्य नियमने बंधने अभ्युद्यत
स्य प्रवृत्तस्य विष्णोर्व्यापकस्य भगवतस्त्रिविक्रमस्य श्यामः कृष्णवर्णः पाद इव तिर्यगायामेन दिग्प्रवेशनार्थं तिरश्ची

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान् हंसद्वारं भृगुपतिय
शोवर्त्म यत् क्रौंचरंध्रं तेनोदीचीं दिशमनुसरेस्तिर्यगायामशो
भी श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ५८ ॥

नैवैरंध्रेणाशोभितः अतितिर्यगायामशोभी सन् तत्क्षीणत्वेनापि उदीचीं दिशमनुसरेः अनुगच्छेः पुरा किल भार्गवो
देवात् पूर्वं दैत्यगुरूपनिषदमधीयानो भृगुनंदनेन स्कंदस्पर्द्धया क्रौंचशिखरिणमतिनिशितविशिखमुखेन दलया
मास तं रंध्रमयं भिन्नात् तव क्रौंचक्रीडाद्रिवत्सरः समुत्तुंगभित्ते कस्मिन्नपि यशः दीपनिर्यो निखिलजगज्जालमाप्यालि
तमिति कथा श्रूयते ५८ ॥

मे॰टी॰ तत्रेति तत्रकैलासेअवश्यंसर्वथासुरयुवतयोवलयकुलिशानिकंकणकोटयः शातकोटिवाचिनाकुलिश 66
३४ शब्देनकोटिमात्रंलक्ष्यतेतेनतदुद्घट्टनानिप्रहारास्तैरुद्गीर्णंमुक्तंतोयंयेनतंत्वांयंत्रेष्वधाराः यंत्रधारास्ता
साएवगृहंयंत्रधारागृहत्वंनेष्यंतिप्रापयिष्यंति हेसखेविदेमित्रघर्मेनिदाघेलब्धस्यघर्मलब्धस्यतवस्यादेव
भूमिषुसर्वत्रसमादानात. प्राप्तिकमेवतादृशायथोक्तमाषाढस्यप्रथमदिवसेमेघंददर्शेतितत्तवताभ्यः स्व।

तत्रावश्यंवलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यंतित्वांसुरयुवतयोयंत्रधारागृहत्वं
ताभ्योमोक्षस्तवयदिसखेघर्मलब्धस्यनस्यात
क्रीडालोलाःश्रवणपरुषैर्गर्जितैर्भीषयेस्ताः
६५

रयुवतिभ्योमोक्षोनस्याद्यदितदाक्रीडालोलाःक्रीडासक्ताःप्रमत्ताइत्यर्थः ताः सुरयुवतीः श्रवणपरुषैः।
कर्णकटुभिर्गर्जितैःकठोरैःभीषयेः त्रासयेः अत्रहेतुभयाभावात्तद्भीहेतुभयेइत्यनेनात्मनेपदंनापिपि ३४
योहेतुभयेषुगित्यनेनषुगागमः ६५ ॥

उत्पश्यामीति स्निग्धं मसृणं भिन्नं मर्दितं च यदंजनं कज्जलं तस्याभा यस्य तस्मिन् त्वयि तटगते सानुगते सति सद्यः
कृत्तस्य छिन्नस्य द्विरदशनस्य गजदंतस्य छेदवत् गौरस्य धवलस्य तस्याद्रेः कैलासस्य मेचके श्यामले कालश्यामलमेचका
इत्यमरः वाससि वस्त्रे अंसन्यस्ते सति हलभृतो बलभद्रस्य वस्तिमिताभ्यां नयनाभ्यां प्रेक्षणीयां शोभां भविष्यां भा
विनीं उत्पश्यामि शोभां भविष्यतीति तर्कयामीत्यर्थः श्रौती पूर्णोपमालंकारः ६३ हित्वेति तस्मिन् क्रीडाशैले कै

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नांजनाभे सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य शोभा
मद्रेः स्तिमितनयनप्रेक्षणीयां भविष्ठी मंसन्यस्ते सति हलभृतो मेचके वाससीव ६३ तस्मि
न्हित्वा भुजगवलयं शंभुना दत्तहस्ता क्रीडाशैले यदि च विचरेत्पादचारेण गौरी भंगीभक्त्या
विरचितवपुः स्तंभितांतर्जलौघः सोपानत्वं कुरु मणितटारोहणायाग्रयायी ६४ ॥

लासे कैलासकनकाद्रिश्च मंदरो गंधमादनः क्रीडार्थं निर्मिताः शंभोर्देवैः क्रीडाद्रयो भवन्निति शंभुरहस्ये शंभु
ना शिवेन भुजगपवलयं कंकणादित्यागो र्याभीरुत्वात् त्यक्त्वा दत्तहस्ता प्रवलंवित हस्ता सती गौरी पादचारे
ण विचरेद्यदि तर्हि अग्रयायी पुरोगतः तया स्तंभितो घनीभावं प्रापितो ऽंतर्जलौघः प्रवाहो यस्य तथाभूतो भं
गीभिः तरंगाणां भक्त्या रचनया विरचितवपुः कल्पितशरीरः सन् मणीनां तटं मणितटं तस्याः आरोहणाय सोपा

नवैकसोपानमावैमहस्पर्शः ६४ ॥

मे॰टी॰
३५

तस्येति प्रणयिनः प्रियतमस्येव तस्य कैलासस्य उत्सङ्गे क्रोडभागे उरोचः उत्सङ्गेमुक्तसंयोगे सक्थिन्यूर्द्ध्वतलेपि चेतिमाल
तीमालायांगगाडुकूलेशुभ्रवस्त्रमिवस्रस्तमिति समासः डुकूले सूक्ष्मवस्त्रे स्यात् इति यस्मितां शुक इति शब्दार्णवे का।
मिन्यात्तु गंगेव डुकूलं तत्स्रस्तं यस्यास्तां तथोक्तां मलकांकुबेरनगरीं दृष्ट्वा कामिनीमिवेति शेषः हे कामचारिन्
त्वं पुनस्तां न ज्ञास्यसे नावगमिष्यसे इति न किन्तु ज्ञास्यस्येवेत्यर्थः कामचारित्वात्पूर्वमपि बहुकृत्वा दर्शनसं
भवात् विज्ञातेनैव संभावितमेवेति निश्चयार्थे नञ्द्वयप्रयोगः तदुक्तं स्मृतिनिश्चये सिद्धार्थे नञ्द्वयप्रयोगः इति।
उच्चैर्विमाना सप्तभूमिकभवनानि विमानो स्त्री देवयाने सप्तभूमौ च सद्मनीति यादवः तानि यस्यां सा मेघवा रूपनस्या

तस्योत्सङ्गे प्रणयिन इव स्रस्तगंगादुकूलां न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् या वः
काले वहति सलिलोद्गारमुच्चैर्विमाना मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दं इति मेघ उत्तरमे

नस्त्वनार्थमिदं विशेषणं अन्यत्र विमाना विगतमाना निःकोपा या अलका वो ख्यानेष्वेवमेव। २ ॥
युष्माकं काले मेघकाले इत्यर्थः कालसर्वधारणा हं इति बहुवचने सलिलमुद्गिरतीति सलिलोद्गारं सवत्सलिलधा
रमित्यर्थः अभ्रवृन्दं मेघकदम्बकं कामिनी स्त्री मुक्ताजालैः मौक्तिकसरैर्ग्रथितं प्रत्युप्तं पुष्पसल्पो मौक्तिके मुक्ते तियाद
वः अलकमिव चूर्णकुन्तलानिव नारौकवचने अलकाश्चूर्णकुन्तलाः इत्यमरः वहति बिभर्तीति अत्र कैलासस्यानुकू
लनायकत्वमलकायाः स्वाधीनपतिकात्वं नायकान्तेष्वन्यतेष्वेकपत्नीकोऽनुकूलः स्यादिति प्रियाय लालितानि।
स्वाधीनपतिकामते तिउदाहरणमिव लालयन्नलकप्रान्तान् रचपन्मञ्जरीपनाविनोदयेकान्तः ज्ञापावदत्तुव

नीतानि ६८ इति श्रीमद्धीं पायप्रसलिकाव्यसंर्यविताणांमेघसंदेश
व्याख्यायांश्रीविवर्धितपूर्वमेघः २ ॥

68

हेमांभ इति हेमजलदहेमेव हेमांभोजानां प्रसविजनकं जिगद्दीप्यादिना इति प्रत्ययः मानसस्य सरसः सलिलमाददानः पिबन्नित्यर्थः तथा ऐरावतस्येंद्रगजस्य कामं यथा रितथा ह्याशीवसेवार्थं मिद्रागमनाद्धासमागतस्येति भावः क्षणमा त्रस्तजलादानकाले मुखपटेन या प्रीतिस्तां कुर्वन् तथा कल्पद्रुमाणां किशलयानि पल्लवभूतानंऽशुकानि सूक्ष्म वस्त्राणि ग्रंशुकं वस्त्रमात्रे स्यात्परिधानोत्तरीययोः सूक्ष्मवस्त्रेनातिदीमाविति शब्दार्णवः तानीव वातैर्मेघवातैः धुन्व

हेमांभोजप्रसवि सलिलं मानसस्याददानः कुर्वन्कामं क्षण
मुखपटप्रीतिमैरावतस्य धुन्वन्कल्पद्रुमकिशलयान्यंशुका
नीव वातै र्नानाचेष्टैर्जलदललितैर्निर्विशेस्तं नगेंद्रं ६९ ॥

न्तु नानाबहुविधा चेष्टास्तोयपानादयो येषु तैः ललितैः क्रीडितैः नाभावभेदे स्त्रीनपुंसे ललितं त्रिषु सुंदरे ग्रासि यो ऽस्मद्दागारे क्रीडितेनानयहूवेइति शब्दार्णवे तं नगेंद्रं कैलासं कामं यथेष्टं निर्विशेः समुपभुंक्ष्व निर्वेशो भृतिभो गयोरित्यमरः यथेच्छाविहारो मित्रगदेहस्य मे प्रमाः फलं सहजमित्रं च वने कोलाहलः मेघपर्वतयोः अन्नस्यंयो ग्रा ग्नेश्चंद्रयोः शिखिनीमृतयोः समीराग्न्योः दृष्टिरम्ययोः मित्रतामस्ययमिति दर्शनादिति भावः ६९ ॥

संप्रति सर्वदा सर्वर्तुसंपत्तिमाह हस्त इति यत्रालकायां वधूनां स्त्रीणां हस्ते लीलाकमलं लीलार्थं कमलं शरदि
गमेतत्पदं कं शारत्पंकजलक्षणाति अलके कुन्तले जात्यैकवचनं अलकेष्वित्यर्थः बालकुन्दैः अभिनवकुन्दकुसुमैः अ
नुविद्धम् अनुवेधो ग्रथितं तेन पुंस्येकभावेन यद्यपि कुन्दानां शिशिरत्वम् अस्ति माघ्यं कुन्दमित्यभिधानात् तथापि इदमेतेषा
द्भावः शिशिरे पौष्पमिति व्याख्यातम् अनेन हेमन्तकार्यत्वमित्याशयेन बालविशेषणं अलकमिति प्रथमान्तपाठे स
मीप्रक्रमभङ्गः स्यात् तत्र यत्नान्नियतपुंलिङ्गत्वाद्दानिश्चेति दोषान्तरमाह तदसत् स्वभाववक्राण्यलकानि तासां
नित्यं तान्यलकाया यातिपुरः कुन्तलास्त्वेव यः खण्डितं पुमादि पुंनपुंसकलिङ्गतादर्शनादिति आनने मुखे लोध्रप्र

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः। चूडापा
शे नवकुरबकं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ६५ ॥

सवानां लोध्रपुष्पाणां शैशिराणां रजसा परागेण स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचनमित्यमरः पाण्डुतां नी
ता श्रीः शोभा चूडापाशे केशपाशे नवकुरबकं वासन्तः पुष्पविशेषः कर्णे चारु पेशलं शिरीषं ग्रैष्मः पुष्पविशेषः सीम
न्ते मस्तके सीमन्तः मस्तके केशवीथ्यामुदाहृतमिति शब्दार्णवे त्वदुपगमस्त्वदुपगमः मेघागम इत्यर्थः तत्र जातं
त्वदुपगमजं वार्षिकमित्यर्थः नीपं कदम्बकुसुमं सर्वत्रास्तीति शेषः अस्ति भवति प्रथमपुरुषोऽप्रयुज्यमानोऽप्य
स्तीति न्यायात् अत्र कमलकुन्दादिभिः कार्यसमाहाराभिधानार्थं तत्सर्वर्तुसमाहारसिद्धिः कारणं विना कार्यसमा

श्रीमहिमोदयः ६५ ॥

विद्युत्वंतमिति यत्रालकायां ललिताः रम्या वनिताः स्त्रियो येषु ते सह चित्रैर्वर्तंत इति सचित्राः आलेख्याश्चर्ययोश्चि
त्रमित्यमरः तेन सहेति तुल्ययोग इति बहुव्रीहिः वोपसर्जनस्येति सहशब्दस्य सभावः संगीताय तौर्यत्रिकाय प्र
हतमुरजास्ताडितमृदंगाः मुरजस्तु मृदंगः स्याड्ढक्कामुरजयोरपि इति शब्दार्णवे मणिविकारा भुवो येषु ते अभ्रं
लिहंतीति अभ्रंलिहाः अभ्रंकषाणि वहाभ्रे लिहः इति खच्प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः अभ्रंलिहान्य
ग्राणि शिखराणि येषां ते तथोक्ताः अतितुंगा इत्यर्थः प्रासादाः देवगृहाणि प्रासादो देवभूभुजामित्यमरः विद्युतो

विद्युत्वंतं ललितवनिताः सेंद्रचापं सचित्राः संगीताय प्रहतमुर
जाः स्निग्धगंभीरघोषं अंतस्तोयं मणिमयभुवस्तुंगमभ्रंलिह
ाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ६८ ॥

स्मिन्संतीति विद्युत्वंतं सेंद्रचापं सेंद्रचापवंतं स्निग्धं श्राव्यं गंभीरो यश्च घोषो गर्जितं तद्वंतं निर्यस्तनं तुंगमुन्नतं त
त्वां तैस्तैर्विशेषैः ललितवनितत्वादिधर्मैः करणैस्तुलयितुं शमीकर्तुं तुलाशब्दात्तत्करोतीति णिचंतात्तुमुन्प्रत्ययः
अलं पर्याप्ताः अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः अत्रोपमानोपमेयभूतमेघप्रासादयोर्धर्मिणोर्वि
द्युल्ललितवनितादीनां यथासंख्यमन्योन्यसादृश्यमिति हि रीत्या बिंबप्रतिबिंबतानेनेयमुपमा संपूर्णा ६८ ॥

मे॰ टी॰ ३७

यस्यामिति यस्यामलकायां यक्षा देवयोनिविशेषाः उत्तमस्त्रीसहाया ललितांगनासहचराः संतः सितमणिम
यानि स्फटिकमणिमयानि चंद्रकांतमयानि वा अत एव ज्योतिषां ताराकाणां छायाः प्रतिबिंबान्येव कुसुमानि तैः
रचितानि परिष्कृतानि ज्योतिस्ताराशब्देभाज्वालाहकप्रार्थ्यध्वराल्पत्विति वैजयंती एतेन पानभूमेरम्लानशोभा।
त्वमुक्तं हर्म्यस्थलान्येत्य प्राप्य त्वद्गंभीरध्वनिरिव ध्वनिर्येषां तेषु पुष्करेषु वाद्यभांडमुखेषु पुष्करोऽस्त्री हस्ताग्रवाद्यभांड

यस्यांयक्षाःसितमणिमयान्येत्यहर्म्यस्थलानि ज्योतिश्छाया।
कुसुमरचितान्युत्तमस्त्रीसहायाः आसेवंतेमधुरतिफलंकल्पवृक्षप्रसूतं
त्वद्गंभीरध्वनिषुशनकैःपुष्करेष्वाहतेषु ७२॥

मुखेजलव्योमरः शनकैर्मंदमाहतेषु सत्सु पतनत्वत्सुगीतयोरप्युपलक्षणं कल्पवृक्षप्रसूतं कल्पवृक्षस्य
कारणमर्थं प्रदत्वात् मद्यमपि तत्र प्रसूतं रतिः फलं यस्य तत् रतिफलं रतिजनकं वा रतिफलाख्यं मधु मद्यमासेवंते।
आहुरण्यपिवतीत्यर्थः मालतीरसितामृतामलयुजोत्पनाद्यकालाह्वयाधाविद्रुममोरटात्तकदलीगुग्गुल
प्रसूनैर्युक्तात्रिवृंद्धेनमधुपुष्पमोगपवित्रहृद्भाण्डमूलामृतक्वाथेनमारटीयनरतिफलाख्यंस्वादुशीतमधु

इतिमें टिप्पणि ७२ ॥

यत्रेति यत्रालकायां पादपाः वृक्षाः नित्यं पुष्पाणि येषां ते तथा न चर्त्तुनियमादिति भावः अत एवोन्मत्तैः भ्रमरैः मुखराः
शब्दायमानाः नलिन्यः पद्मिन्यो नित्यानि पद्मानि यासां तास्तथा नतु हेमंतवर्जितमित्यर्थः अत एव हंसश्रेणीभिः रचि
तरशनाः नित्यं हंसपरिवेष्टिता इत्यर्थः भवनशिखिनः क्रीडामयूराः नित्यं भास्वंतः कलापाः वर्हाणि येषां ते तथोक्ताः
नतु वर्षास्वेव अत एव केकाभिरुत्कंठा उद्ग्रीवाः प्रदोषाः रात्रयः नित्यं ज्योत्स्ना येषां ते नित्यज्योत्स्नाः नतु शुक्लपक्ष
एव अत एव प्रतिहता तमसां वृत्तिर्येषां ते ते च ते रम्याश्चेति तथोक्ताः ३ आनंदेति यत्रालकायां वित्तेशानां य।

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पाः हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः केकोत्कं
ठा भवनशिखिनो नित्यभास्वत्कलापा नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः प्रदोषाः ३ आनं।
दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् नाप्यन्यस्मा
त्प्रणयकलहाद्विप्रयोगोपपत्ति वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ४ ॥

नां वित्ताधिपः कुवेरस्वाम्युभौ पतिकपत्नयोरिति शब्दार्णवे आनंदोत्थमानंदजन्यमेव नयनसलिलं अश्रु अन्यैर्नि
मित्तैः शोकादिभिर्न खलु नास्त्येव इष्टसंयोगेन प्रियजनसमागमेन साध्यात् निवर्त्तनीयात् तत्प्रतीकार्यादित्यर्थः
कुसुमशरजात् मदनजन्यात् तापात् संतापो नास्ति प्रणयकलहादन्यस्मात् मरणादिकारणात् विप्रयोगोपपत्तिर्वि
रहप्राप्तिरपि नास्ति किं च यौवनादन्यद्वृद्धत्वं बाल्यं वा नास्ति एतत् श्लोकद्वयेऽपि समम् ४ ॥

मे॰टी॰ नीवीति यत्रालकायांअनिभृतकरेषुचपलहस्तेषुप्रियेषुनीवीवस्त्रग्रंथिःनीवीपरिपणेग्रंथौस्त्रीणांजघनवा। 74
३९ ससीतिविश्व नीव्येववंधोनीवीवंधः उच्छ्वसितवत्पीनत्वंतस्मोच्छ्वसितेनत्रुटनेनशिथिलंक्षौमंदुकूलंरागा।
दाक्षिपत्सुआहरत्सुह्रीमूढानांलज्जाविधुराणांबिंबिकाफलंबिंबफलेबिंबिकायाःप्रतिबिंबेचमंडलइति।

नीवीवंधोछ्वसितशिथिलंयत्रविंवाधराणां
क्षौमंरागादनिभृतकरेष्वाक्षिपत्सुप्रियेषु
अर्चिस्तुंगानभिमुखमपिप्राप्यरत्नप्रदीपान्
ह्रीमूढानांभवतिविफलप्रेरणाचूर्णमुष्टिः ७५

विंबः विंबमिवाधरोयासांतासांविंवाधराणांस्त्रीविशेषाणांविशेषाः कामिनीकांताभीरुविंवाधरांगनेतिशब्दा
र्णवे चूर्णास्यकुंकुमादेर्मुष्टिः अर्चिषिमिमयूखेवस्तुंगान् अर्चिर्मयूखशिखयोरितिविश्वः रत्नान्येवप्रदीपान् अभिमु ३९
खंयथातथाप्राप्यापिविफलप्रेरणादीपनिर्वापणात्समर्थात्त्वात्फलादेयोभवति अत्रांगनानांरत्नप्रदीपनि।
र्वापणाप्रवृत्त्यामोग्ध्यंव्यज्यते ७५ ॥

मंदाकिन्याउति यत्रालकायांअमरैःप्रार्थिताःप्रार्थ्यमानाःसंदर्प्यश्चर्याः कन्याःपतत्कमार्थःकन्याःकुमारिकानार्योवि
तिविस्त्रःशिशिरैःमंदाकिन्याःगंगायाःपयसिमरुद्भिर्माहतैःसेव्यमानाःसत्यःतयाअनुतटेषुरोहत्यनुतटरुहःः
क्विपुउपपदमितिडितिसमासः तेषांमंदाराणांछाययाआतपेनवारितोस्माःशमितातयाःसत्यःकनकस्पसिक।
तासुमुष्टिभिर्निक्षेपणगूढैःसंहृतैः अथवाकनकसिकतानामुष्टिषुनिक्षेपणगूढैः अतएवान्वेष्टव्यैर्गोपेर्मणि

मंदाकिन्याःपयसिशिशिरैःसेव्यमानामरुद्भि
र्मंदाराणामनुतटरुहांछायया वारितोष्णाः
अन्वेष्टव्यैःकनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडंतेमणिभिरमरप्रार्थितायत्रकन्याः १४

भिरत्नैःसंक्रीडंतेगूढमणिसंज्ञयादेशिकक्रीडयासम्यकक्रीडंतेरमंतेइत्यर्थः क्रीडोनुसंपरिभ्यश्चेत्यात्मनेपदंरत्नादे
वागंतिर्दृष्ट्यकर्मभिः बालिकाभिःकृताक्रीडानाम्नागूढमणिःस्मृता आवासक्रीडागूढमणिगूढकेलिस्तथा
पत्रेपिच्छकंडुककंदाद्यैस्मृताःकंडुककेलयइतिशाश्वतोवे १४ ॥

मे॰टी॰ दैमेत्वयत्रालकायांनिशीथेः ईरात्रेअर्द्धरात्रनिशीथौद्वावित्यमरः त्वत्संरोधस्यमेघावरणस्यापगमेनविशदैर्नि 76

३५ र्मलैश्चन्द्रपादैश्चन्द्ररश्मिभिः पादारश्म्यंघ्रितुर्यांशा इत्यमरः स्फुटजललवस्यन्दिनउल्बणोदकणास्राविणश्चन्द्र

जालावलम्बाः वितानलम्बितसूत्रगुञ्जाधाराः तन्तुगुम्फिताइत्यर्थः चन्द्रकान्ताश्चन्द्रकान्तमणयः प्रियतमा

यत्रस्त्रीणांप्रियतमभुजोच्छ्वासितालिङ्गितानाम्

मङ्गग्लानिंसुरतजनितांतन्तुजालावलम्बाः त्व

त्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे व्यालु

म्पन्तिस्फुटजललवस्यन्दिनश्चन्द्रकान्ताः १६

नांभुजैरुच्छ्वासितानिश्रांत्याजलसेकापवादशिथिलितान्यालिंगितानियासांतासांस्त्रीणांसुरतजनितामंग। ३५

ग्लानिमवयवानांग्लानिंतांव्यालुम्पन्तिअपनुदन्ति १६ ॥

नेत्रेति हे भैमि नेत्राग्रे केण सततगतिना सदागतिना वायुना मातरिश्वा सदागतिरित्यमरः यद्विमानाग्रभूमीर्यस्या
अलकाया विमानानां सप्तभूमिकभवनानां अग्रभूमीरुपरिभूमिकालीनाः प्रापितानामिव यत्पतीतिमा दृशः भवा
दृशा इत्यर्थः स्मरादिपुरुशोः नालोचनेन कज्वेतिकअत्ययः जलमुचो मेघाः आलेख्यानां सचित्राणां सचित्रे लिखितं हि
पद्यः स्मारालेख्यत्वयत्नेन निर्मितानामिति शङ्कासिव सलिलकणिकाभिर्जलकणैर्दोषस्फोटनमुत्पाद्य सद्यः

नेत्रानीताः सततगतिना यद्विमानाग्रभूमी रालेख्यानां।
सलिलकणिकादोषमुत्पाद्य सद्यः शंकास्पृष्टा इव जलमुचस्त्वा।
दृशा जालमार्गै धूमोद्गारानुकृतिनिपुणाजर्जरानिःपतंति ७५ ॥

शंकास्पृष्टा इव सापराधतया विष्टा इव शंकावितर्कभययोरिति शङ्काकुलितेव धूमोद्गारस्य धूमनिर्गमस्यानुकृतौ
अनुकरणे निपुणाः कुशलाः फर्फराः विशीर्णाः सन्तः जालमार्गैर्गवाक्षरन्ध्रैः निःपतन्ति निःक्रामन्ति सयथाकेन
चिद्यतः पुरसेवारवनाहूतेन गृहकृत्यारम्भस्य भूमिं प्रापिताः स्तत्रहीणाः अभिचारदोषमुत्पाद्य सद्यः सा शंकाः कु
सवेषान्तराजाराः त्वदमार्गैर्निःक्रामन्ति तद्वदिति ध्वनिः प्रकृतार्थे शंकास्पृष्टा इवेत्यभेता ७५ ॥

मे॰टी॰
भु॰

गतीति यत्रालकायां कामिनीनामभिसारिकाणां निशि भवो नैशो मार्गः सवितुरुदये सति गत्यागमनेनोत्कं
पश्चलनेन तस्माद्धेतोः अलकेभ्यः पतितैः मंदारपुष्पैः स्वर्गतरुकुसुमैः तथा पत्राणां यत्रलतानां छेदैः खंडैः पति
तैरिति शेषः कर्णाभ्यां विभ्रंशंते इति कर्णविभ्रंशीनि तैः कनकस्य कमलैः कनककमलैश्च षष्ठ्या विवृति

गत्युत्कंपादलकपतितैर्यत्र मंदारपुष्पैः पत्र
च्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च मु
क्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै नै
शो मार्गः सवितुरुदये सूच्यते कामिनीनां १८

तार्थलाभे सति मपदातिप्रदेः स्याद्वारदोषएवमन्यत्राप्यनुसंधेयं तथा मुक्ताजालैर्मौक्तिकसरैः शिरोनिहि
तैरिति शेषः तथा स्तनयोः परिसरः प्रदेशस्तत्र छिन्नानि सूत्राणि येषां तैः हारैश्च सूच्यते ज्ञाप्यते मार्गोप भु॰
तितमंदारकुसुमादिलिंगैरयमभिसारिकाणां पंथा इत्यनुमीयत इत्यर्थः १८ ॥

78

अतत्प्येति देवेंशाकाः तेप्याः तस्यजप्योशाकार्थे निपातः ततोनञ्समासः भवनानामंतर्भवनं अव्ययंविभक्ती
सादिनाः अव्ययीभावः अतत्प्या अंतर्भवनमंतर्भवनेवानियथयोयेषां तेतथोक्ताः यथेच्छाभोगसंभावनार्थमिदं
विशेषणं विबुधवनिता अप्सरसः तापववारमुख्या वेश्याविशेषाः तासदायायेषां तेतथोक्ताः वारस्त्रीगणिका
वेश्यारूपाजीवा यसाजनैः सत्कृता वारमुख्या प्सरादित्यमरः वद्दालायाः संभावितसंलापाः कामिनः कामिकाश्च

अतत्प्यांतर्भवननियथयः प्रत्यहंरक्तकंठैः स्तुद्गायद्भिर्धनपतियशः
किन्नरैर्यत्रसार्द्धं वैभ्राजाख्यंविबुधवनितावारमुख्यासहायाः
वद्दालायावहिरुपवनंकामिनोनिर्विशंति ११ ॥

हृत्यः हृतिप्रत्यहं प्रत्ययंविभक्तीत्यादिनासमासः प्रतश्चेतिसमासांतष्टच् अल्स्शेवोरेवेतिटिलोपः रक्तोम
धुरः कंठः कंठध्वनिर्येषां तैर्नरक्तकंठैः धनपतियशः कुबेरकीर्तिमुच्चैर्गायद्भिः देवगानस्यगांधारग्रामत्वान्तार
तरंगायद्भिरित्यर्थः किंनरैः सार्द्धं सहविभ्राजस्येदं वैभ्राजमित्याख्यायस्यतद्वैभ्राजाख्यंविभ्राजेननगेंद्रेणाद्य
तवैभ्राजमाख्ययेतिशंभ्राद्रस्येवैत्र्याधस्यनामांतरमेतत्तवद्दिहृपवनवाह्योद्यानंतीर्विशंत्यनुभवंति ११

मे॰टी॰ वासस्इति यत्रालकायांचित्रंनानावर्णंवासोवस्त्रंपरिधेयमंडनमेतत्तनयनयोर्विभ्रमाणामादेशेउपदेशेद
४१ तेविभ्रमोत्पादकमित्यर्थः. मधुमद्यंचनेनविभ्रमदानामधुनोमंडनत्वमनुमथेयतच्चमंडनादिकुंडलादिव
देहयार्थैःतस्मात्किसलयैःपल्लवैःसहपुष्पोद्भेदंउभयंचेत्यर्थः इदंतुकचधार्यंभूषणानांविकल्पानविशे ४०

वासश्चित्रंमधुनयनयोर्विभ्रमादेशदक्षं पु
ष्पोद्भेदंसहकिशलयैर्भूषणानांविकल्पान
लाक्षारागंचरणकमलन्यासयोग्यंचयस्या
मेकःसूतेसकलमबलामंडनंकल्पवृक्षः ८

षान् देहधार्यमेतत्तनयाश्चरणकमलयोर्न्यासस्तुसमर्पणंतस्ययोग्यंपरज्यतेऽनेनेतिरागोरंजनद्रव्यंलाक्षे
वरागस्तल्लाक्षारागंचइदंचअगरागादिविलेपनमंडनोपलक्षणमिति सकलंसर्वंचतुर्विधमस्मीत्यर्थः
अबलामंडनंयोषित्प्रसाधनजातमेकःकल्पवृक्षएवसूतेजनयति नतुनानासाधनसंपादनप्रयासइत्यर्थः ८

मत्वेति हे जलद यत्रालकायां मन्मथो धनपतेः कुबेरस्य सखा इति धनपतिसखः राजाहःसखिभ्यष्टच् तं देवं म
हादेवं साक्षाद्वसंतं सन्निहितेऽविपन्नरूपेण वसंतं वर्तमानं मत्वा ज्ञात्वा भयात् भालेक्षणभयात् षट्पदा एव
ज्या मौर्वी यस्य तं चापं प्रायः प्राचुर्येण न वहति न बिभर्ति कथं तर्हि तस्य कार्यसिद्धिरित्यत आह सभ्रूभङ्गेति तस्या
मन्मथस्यारंभः कामिजनविजयव्यापारः सभ्रूभङ्गप्रहितानि नयनानि दृष्टयो येषु तैर्लक्ष्येषु कामिनया

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसंतं
प्रायश्चापं न वहति भयान्मन्मथः षट्प
दज्यं सभ्रूभंगप्रहितनयनैः कामिलक्ष्ये
ष्वमोघैस्तस्यारंभश्चतुरवनिताविभ्रमैरे
व सिद्धः ॥ १४ ॥

वलक्ष्याणि तेष्वमोघैः सफलयोगैरित्यर्थः म न्मथचापस्तु क्वचिदपि मोघः स्यादिति भावः चतुरा
श्च ता वनिताश्च तासां विभ्रमैर्विलासैरेव सिद्धो निष्पन्नः परिनिर्वर्त्तकोपास्तिकफले च तत्प्रयोगाद्धरनिश्चितसा
धनप्रयोगोतिभावः कचपाशं देहयापं पायितं विलेपनं चतन्वभूषणोपायः स्त्रीणामन्मथदैशिकमिति ॥

[illegible] ॥

मे॰टी॰ इतः परं पंचभिः श्लोकैः स्वमिलनांतरमाह वापीति अस्मिन्मदीयागारे मरकतशिलाभिर्बद्धः सोपानमार्गो 82
८२ यस्याः सा तथोक्ता विदूरभवाः वैदूर्याणि विदूरात्प्रभवतीत्यर्थे ञ्य इति ञ्यप्रत्ययः वैदूर्याणां विकारा वैदूर्याणि वि
कारार्थे अण्प्रत्ययः स्निग्धानि वैदूर्याणि नालानि येषां तैः हैमैः सौवर्णैः विकचकमलैः छन्ना वापी चास्मि

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा है
मैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः । या
स्यास्तोये कृतवसतयो मानसं संनिकृष्टं नाध्या
स्यंति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ८२ ॥

न्नस्तीति शेषः यस्याः वाप्यास्तोये कृतवसनपङ्कृतनिवासाः हंसास्त्वामपि प्रेक्ष्य व्यपगतशुचः वर्षाकालेपि व्य ८२
पगतकलुषजलत्वाद्धीनदुःखाः संतः संनिकृष्टं सन्निहितं सुगममपीत्यर्थः मानसं मानसाख्यं नाध्या
स्यंति नोत्कंठया स्मरिष्यंति आध्यानमुत्कंठास्मरणमिति काशिकायां ८२ ॥

इत्यमलकां वर्णयित्वा तत्र स्वभवनं साभिज्ञानमाह तत्रेति तत्रालकायां धनपतिगृहानुत्तरेण कुवेरगृहेभ्य
उत्तरस्मिन्प्रदेशे एनबन्यतरस्यामदूरेऽपंचम्या इत्येनप्प्रत्ययः एनपा द्वितीयेति द्वितीया गृहाः पुंसि च
भूम्न्येवेत्यमरः धनपतिगृहादिति पाठे उत्तरेणेत्येनप्प्रत्ययान्तं किं तु तोरणेनेत्यस्य विशेषणं तृतीया
न्तं धनपतिगृहादुत्तरस्यां दिशि यत्तोरणं वर्तते तेन लक्ष्यं इत्यन्वयो वा द्रष्टव्य एकाकृतानुतापपाठस्तुष्टः ।
अस्माकमिदमस्मदीयं गृहादिभ्यश्चेति छप्रत्ययः आगारं गृहं सुरपतिधनुश्चारुणा मनोहरेण दर्शनात्कथना

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं दूराल्लक्ष्यं सुरपतिधनु
श्चारुणा तोरणेन यस्योपान्ते कृतकतनयः कां
तया वर्द्धितो मे हस्तप्राप्यस्तवकनमितो वालमंदारवृक्षः ८१

येंद्रचापसदृशेन तोरणेन वहिर्द्वारेण दूराद् दूरतः लक्ष्यं दृश्यं अनेनाभिज्ञानेन दूरत एव ज्ञातुं शक्यमित्यर्थः
अभिज्ञानांतरमाह यस्यागारस्योपान्ते प्राकारान्तः पर्यंतदेशे मम कान्तया वर्द्धितः पोषितः कृतकतनयः
कृत्रिमपुत्रः पुत्रत्वेनाभिमन्यमान इत्यर्थः हस्तेन प्राप्यैर्दूरस्थावचेयैः स्तवकैर्गुच्छैर्नमितः स्याद्गुच्छकस्तु
स्तवक इत्यमरः वालो मंदारवृक्षः कल्पवृक्षोऽस्तीति शेषः ८१ ॥

मे॰टी॰
८३

रक्तेति अत्र क्रीडाशैले कुरवकाख्यवृतिरावरणं यस्य तस्य मधौ वसंते भवा माधव्यस्तासां मंडपस्तस्यातिमुक्त
लतामंडपस्य अतिमुक्तः पुंड्रकः स्याद्वासंती माधवीलता इत्यमरः प्रत्यासन्नौ समीपस्थौ चलकिशलयश्च
लपल्लवः अनेन नूतनस्य पादताडनेष्वशजलित्वमस्यैतेन रक्ताशोकः रक्तविशेषणं तस्य स्मरोद्दीपकत्वा
त्कांते प्रसूनकेसरैः शोकस्तु स्पृष्टो रक्त इति द्विधा बहुमित्यधिकारः अतो रक्तो वसंतस्मरवर्धनत्वमशोककल्पदर्शना
त्कांतः कमनीयः केसरो बकुलश्च अथ केसरो बकुलो वंजुल इत्यमरः स्त्रीतिशेषः एकस्तयोरन्यतरः आ
धर्मिकत्वादशोक इत्यर्थः मया सह तव सख्याः स्वप्रियाया इत्यर्थः वामपादाभिलाषी दोहदच्छद्मनेत्यत्रापि

रक्ताशोकश्चलकिशलयः केशरश्चात्र कांतः प्रत्यासन्नौ कुरवकवृतेर्माधवीमंडपस्य एकः
सख्यास्तव सह मया वामपादाभिलाषी कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ७५ ॥

संबंधनीयं सहवाददे चाभिलाषवानित्यर्थः अन्यः केसरो दोहदं छलं ताडीनां प्रसवकारणं संस्कारद्रव्यं तस्य गुल्म
तादीनामकालकुशलैः कृतं पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात् तल्लक्षयति शब्दार्णवे तस्य छद्मना व्याजेन कप
टोहीव्याजदंभोपधयः छद्मकैतवे इत्यमरः अस्याः सख्या वदनमदिरां गंडूषमद्यं कांक्षति मया सहेत्य
त्रापि संबंधनीयं अशोकबकुलयोः स्त्रीपादताडनगंडूषमदिरे दोहदे इति प्रसिद्धिः स्त्रीणां स्पर्शात्प्रियंगुर्विक
सति बकुलः सीधुगंडूषसेकात्पादाघातादशोकस्तिलककुरबकौ वीक्षणालिंगनाभ्यां मंदारो नर्मवाक्यात्पटु

[illegible] कर्णिकाराः ७४ ॥

84

तस्या इति तस्याः वाप्यास्तीरे पेशलैश्चारुभिः चारौ दक्षे च पेशल इत्यमरः इंद्रनीलै रचितशिखरः इंद्रनीलमणि
मयशृंग इत्यर्थः कनककदलीनां वेष्टनेन परिधानात्प्रेक्षणीयो दर्शनीयः क्रीडाशैलः स्यादिति शेषः हे सखे।
उपांतेषु स्फुरितास्तडितो यस्य तेन तथोक्ते इदं विशेषणं कनककदलीसाम्यार्थमुक्तं इंद्रनीलसाम्यं तु मेघस्य स्वा।
भाविकं त्वामित्यनेन सूच्यते त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति हेतोः तस्य शैलस्य मद्गेहिन्याः प्रियत्वाद्धेतोरित्यर्थः का
तरेण भीतेन चेतसा भयं चात्र सानंदमेव वस्तूनामनुभूतानां तत्र श्रवणाद्दर्शनात् श्रवणकीर्तनाद्वापी सानंदा

तस्यास्तीरे रचितशिखरः पेशलैरिंद्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः म
द्गेहिन्याः प्रिय इति सखे चेतसा कातरेण प्रेक्ष्योपांतस्फुरिततडितं त्वां तमेव स्मरामि ८२ ॥

भीर्यथा भवेदिति स्माकारदर्शनात् तमेव क्रीडाशैलमेव स्मरामि एवकारो विषयांतरव्यवच्छेदार्थः सदृश
वस्त्वनुभवाददृष्टार्थस्मृतिर्जायत इत्यर्थः अत एवात्र स्मरणाख्यमलंकारः तदुक्तं सदृशादनुभवादन्यस्मृतिः
स्मरणमुच्यत इति निरुक्तकारस्तु त्वां तमेव स्मरामीति योजयित्वा मेघे शैलत्वमयमाचेष्टतदयुक्तमनाह।
वात् स्मरणाकारो यस्य पुरोवर्तिन्यनुभवात्मकत्वेन स्मरतिशब्दप्रयोगात् शैलत्वभावनास्मृतिरित्यपि नोप
पद्यते भावनायाः स्मृतित्वे प्रमाणाभावादनुप्रयोगात्मादृशेयापन्नामसर्वैपर्यायांश्चविसदृशेशातिग्रामेद्धाभा

मे·टी ४४ एभिरिति हे साधो निपुण साधुः समर्थे निपुणे चेति काशिकायां हृदयनिहितैः सविस्तरैरित्यर्थः एभिः पूर्वो 96
क्तैः लक्षणैः लक्षणादिभिः अभिज्ञानैः द्वारोपान्ते एकवचनमविवक्षितं द्वारपार्श्वयोरित्यर्थः लिखितवपुषौ
आकृतीयुयमस्तौ तयोः शंखपद्मौ नाम निधिविशेषौ निधिर्ना शेवधिर्भेदाः पद्मशंखादयो निधेरित्यमरः
दृष्ट्वा च नूनं सत्यमधुनेदानीं अधुनेति निपातः मद्वियोगेन मम प्रवासेन क्षामच्छायं अल्पकान्ति स्यात् क्षीणा।

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा क्षा
मच्छायं भवनमधुना मद्वियोगेन नूनं सूर्यापा
ये न खलु कमलं पुष्यति स्वामभिख्यां ८९ ॥

कान्तिः भवनं मद्गृहं लक्षयेथाः निश्चिनुयाः तथा हि सूर्यापाये सूर्यापगमे सति कमलं पद्मं स्वामात्मीयाम
भिख्यां शोभाम् अभिख्या नाम शोभयोरित्यमरः आतश्चोपसर्गे इत्यङ् प्रत्ययः न पुष्यति नोपचिनोति खलु। ४४
सूर्यविरहितं पद्ममिव मद्रूपतिविरहितं गृहं न शोभत इत्यर्थः ८९ ॥

तन्मध्यइति किंचेतिचार्थः तन्मध्येतयोर्वृक्षयोर्मध्ये अनतिप्रौढानामनतिकठोराणांवंशानांप्रकाशइवप्रका
शोयेषांतैस्तैर्मरकतमणिभिर्मरकतशिलाभिः मूलेबद्धाकृतवेदिकेत्यर्थः स्फटिकमयफलकंपी
ठंयस्याःसास्फटिकफलिकाकांचनस्यविकारःकांचनीसौवर्णीवासयष्टिर्निवासदंडः स्तीतिशेषः शिंजाभूष
णध्वनिः भूषणानांतुशिंजितमित्यमरः शिंजाशिंजितादेःप्रत्ययः शिंजिधातोरयंनाल्वादित्वेनटंत्यादित्यापिषेवशिं
जितइतिदर्शनात् शिंजाप्रधानानिवलयानिशिंजावलयानितैः सुभगाःरम्यास्तैस्तालैःकरतलवादनैर्मम

तन्मध्येचस्फटिकफलकाकांचनीवासयष्टिर्मूलेबद्धामणिभिरनतिप्रौढवंशप्रकाशैः
तालैःशिंजावलयसुभगैर्नर्तितःकांतयामेयामध्यास्तेदिवसविगमेनीलकंठःसुहृद्वः ८५

कांतयानर्तितोवोयुष्माकंसुहृत्सखानीलकंठोमयूरः मयूरोबर्हिणोबर्हीनीलकंठोभुजंगभुगित्यमरः दिव
सविगमेसायंकालेयांयष्टिकामध्यास्तेअधितिष्ठति अधिशीङ्स्थासांकर्मेतिकर्मत्वाद्द्वितीयातत्रागारमित्यारभ्यपंचसुश्लो
केषुअतिसमृद्धवस्तुवर्णनादुदात्तालंकारः तदुक्तंतदुदात्तंभवेद्यत्रसमृद्धंवस्तुवर्ण्यतइतिनचैषास्वभावोक्तिः
स्वभावोक्तिंचतत्रयथास्थितवस्तुवर्णनात् अत्रकविप्रतिभामात्रापितानामसमानैश्वर्यशालिवस्तुवर्णनादेरपि
नविषयत्वमितितयोर्भेदात् अस्यालंकारस्यसर्वस्वीकारः ८५ ॥

मे॰ टी॰
४५

संप्रति दृष्टिपातफलस्याभिमतानं श्लोकद्वयेनाह तन्वीति तन्वीकृशांगी नतु पीवरी मतांदम्भं कृशोनतु विरलमग: वेतिगु।
णावचनादिति दीप्रप्यामा युवति: श्यामा यौवनमध्यस्थेत्युत्पलमालायां शिखराग्रांग्रेषामेति इति शिखरिण: कोटिमं
त: शिखरे शैलवृक्षाग्रकलापुलिनकोटिषु इति विश्व: शिखरिणो दशना: दंता यस्या: भापवलेपस्य: उक्तं च न
च्यते नडकं सामुद्रिके स्निग्धा: समानरूपा: सुपंक्तय: शिखरिण: स्निग्धा: दंता: भवंति यासां ता पालयंति जगत्सर्वं।
ताम्बूलसरक्ताम्रु: स्फुरणामे: समोरथा: यस्या: शिखरिणो दंता दीर्घं जीवंति तत्प्रिय इति पक्कं परिणतं बिंबं बिंबका
फलमिवाधरोष्ठो यस्या: सा पक्वबिंबाधरोष्ठी शाकपार्थिवादित्वान्मध्यमपदलोपी समास इति वामन: नासिकोद

तन्वी श्यामा शिखरिदशना पक्वबिंबाधरोष्ठी मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभि: श्रो
णीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातु: ८८ ॥

रोष्ठेत्यादिना ङीप् मध्ये क्षामा कृशोदरीत्यर्थ: चकितहरिण्या: प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्या: सा तथोक्ता।
पेतेनवग्रस्ता: पद्मिनीत्वं सूच्यते तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे चकितमृगदृशाभे प्रांतरक्ते च नेत्रे इति निम्न
नाभिर्गंभीरनाभि: अनेन नारीणां नाभिगांभीर्यं मन्मदनसमांतिरेक इति कामसूत्रार्थ: सूच्यते श्रोणीभारादलसगा
मना मंदगामिनी न तु जघनदोषात् स्तनाभ्यां स्तोकनम्रा ईषदवनता न तु वपुर्दोषात् युवतय एव विषयस्तस्मि
न्युवतिविषये युवतिराशिविषय इत्यर्थ: धातुर्ब्रह्मण: आद्या सृष्टि: प्रथमशिल्पमिव स्थितेत्युत्प्रेक्षा प्रथमनिर्मिता यु
वतिरिवेत्यर्थ: प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशाच्छिल्पनिर्माणसौष्ठवं दृश्यत इत्याद्यविशेषण।

88

नित्रारद्वतिस्रयानेनतांकृत्यमाह गत्वेति देमेघशीघ्रसंपातप्रवद्धेतुशीघ्रसंपातहेतस्तस्यशीघ्रसंपातहेतोः शीघ्र
प्रवेशनार्थमित्यर्थः षष्ठीहेतुप्रयोगेतिषष्ठीसंपातः पतितेयोगेप्रवेशेवेदसंविदोरितिशब्दार्णवे सद्यः सपदि
कलभस्यकरिपोतस्यतनुरिवतनुर्यस्यसतस्यभावस्तनुतातां अल्पशरीरतांगत्वाप्रथमकथितेतस्याःक्रीडा
स्यादिनापूर्वोपदिष्टेरम्यसानौनिषीदनयोग्यप्रदेशइत्यर्थः क्रीडाशैलेनिषण्णउपविष्टः सन्अल्पाल्पप्रकाशाभाःप्रका

गत्वासद्यःकलभतनुतांशीघ्रसंपातहेतोः क्रीडाशैलेप्रथमक
थितेरम्यसानौनिषण्णः अर्हस्यंतर्भवनपतितांकर्तुमल्पाल्पभासं ख
द्योतालीविलसितनिभांविद्युदुन्मेषदृष्टिः ८३ ॥

शो यस्यास्तामल्पाल्पभासंप्रकारे गुणवचनस्येतिद्विरुक्तिः खद्योतानामाली पंक्तिः तस्याविकसितेनस्फुरि
तेननिभांसमानांविद्युदुन्मेषोविद्युत्प्रकाशःसएवदृष्टिःतांभवनस्यांतरंतर्भवनंतत्रपतितांप्रविष्टांकर्तुम
र्हसियथाकश्चित्किंचिद्विद्यद्विष्यन् कांश्चिदुन्नतप्रदेशंस्थित्वाशनैःशनैःरतिनत्राशयीयसींदृष्टिंदृष्टदेशंपा
तयति तद्वदित्यर्थः ८३ ॥

मे॰टी॰ ५९

नूनमिति प्रबलरुदितेनोच्छूनेस्फारितपुटेनेत्रेयस्यतत्उच्छूनेतिश्वयतेकर्तरिक्तःओदितश्चेति निष्ठानत्वंवा।
विस्वपीत्यादिनासंप्रसारणंसंप्रसारणाच्चेतिपरपूर्वत्वेहलइतिदीर्घः ऊउत्तुनासिकेचेतिप्रदेशेशङ्केतरूपसि
द्धिरितिवर्तमानाप्रक्रियाशामादिकत्वाडपेत्तणीणानत्यामतियातोरिकारस्यशाम्भावादितिमृगपताकृता
देशस्यवाकोविशेषइतिपतेनविषादोव्यज्यतेनिश्वासानामशिशिरतयाः तः सतापोस्मत्वेनभिन्नवर्णोविल्ला

नूनंतस्याःप्रबलरुदितोच्छूननेत्रंप्रियायाः
निश्वासानामशिशिरतयाभिन्नवर्णाधरोष्ठं
हस्तन्यस्तंमुखमसकलव्यक्तिलंबालकत्वा
दिंदोर्दैन्यंत्वदनुसरणक्लिष्टकांतेर्बिभर्तिः ९०

योऽधरोष्ठोयस्यतत्हस्तेन्यस्तंपतेनचिंताव्यज्यतेलंबालकत्वात्संस्काराभावाल्लंबमानकेशत्वात्असकलव्य ५९
क्तिअसंपूर्णाभिव्यक्तिस्तस्याःप्रियायाःमुखंत्वदनुसरणेनत्वदुपरोधेनक्लिष्टकांतेःक्षीणकांतेःइंदोर्दैन्यंशोच्यां।
तांबिभर्तिनूनमितिवितर्केनूनंतर्केर्थनिश्चयइत्यमरः एवंवक्तयापिनभ्रमितव्यमितिशेषः ९० ॥

तामिति परिमितकथां मितभाषिणीं सहचरे सहचारिणि अनेन वियोगासहिष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते स-
ति सहचरे चक्रवाके दूरीभूते सति चक्रवाकवधूमिव बन्धुनेरहीं विषयादयो यथा दितिङ्ग पुष्पकामेकाकिनीं स्थि-
तां तां मन्नभवनगतां मे द्वितीयं जीवितं जानीथाः जीवितकल्पां मत्प्रेयसीं अवगच्छेत्यर्थः तन्वीत्यादि पूर्वं लत-
योरिति विशेषः लक्षणानामन्यथाभावमाशङ्क्याह गाढेति गाढोत्कण्ठां प्रबलविरहवेदनां रागात् लव्यावि।

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सह-
चरे चक्रवाकीमिवैकां गाढोत्कण्ठां गुरुषु दिवसेषु गच्छ-
त्सु बालां जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपां ॥ ८४

षये वेदनामतीव मासं शेषाषिणिं गाढोत्कण्ठां मुत्कण्ठां विरहदुःखेत्यभिधानात् बालां गुरुषु विरहमहत्सु प-
षु दिवसेषु गच्छत्सु वर्तमानेषु शिशिरेणाशिशिरकालेन मथितां पद्मिनीं वा पद्मिनीमिव अत्र वहायया शङ्का।
वितिदं इदं मन्यस्यरूपां एवं स्वरूपविपरीताकारां जातां मन्ये दिनेन पद्मिनी वान्या सहंशी जातेति मन्ये तर्कयामीत्य-
र्थः एतावतानेयमन्येति स्थूलमितव्यामिति भावः ८४ ॥

मे॰टी॰
४०

उत्संगेति हे सौम्य सा धौतमलिनवसने प्रोषिते मलिनाङ्क शेति शास्त्रादित्यर्थः उत्संगो ऊरौ वीणां निक्षिप्य मम गो
त्रेनामांकं चिह्नं यस्मिन् तं मद्गोत्रांकं मन्नामांकं यथा तथा गोत्रं तु नाम्नि चेत्यमरः विरचितानि पदानि यस्य तत्तथो
क्तं गेयं गानार्हं प्रबंधादि गीतमिति पाठे स एवार्थः उद्गातुं उच्चैर्गातुं कामो यस्याः सा उद्गातुकामा तुं काममनसो
रपीति मकारलोपः दैवयोनित्वाद्गांधारग्रामेण गातुकामेत्यर्थः तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायंति मानुषाः
न तु गांधारनामानं स लभ्यो देवयोनिभिरिति नयनसलिलैः प्रियतमस्मृतिजनितैरश्रुभिरार्द्रां तंत्रीं कथं

उत्संगे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्रांकं विरचितपदं गेयमुद्गातुकामा तं
त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचिद्भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरंती ८२

चित्कृच्छ्रेण सारयित्वा प्रसार्य ताडयित्वा करेण मज्जनप्रत्ययात् क्वणनासंभवादिति भावः भूयो भूयः पुनः पुनः स्वयमा
त्मना कृतामपि विस्मरणार्हामपीत्यर्थः मूर्छनां क्रमविशेषविशिष्टस्वरस्थापनामारोहेषु विलोपनत्वाद्यस्त
स्वपूर्वगाः स्वराणां स्थापना प्रोक्ता मूर्छनाः सप्तसप्ततीति संगीतरत्नाकरे विस्मरंती वा आलोके ते निपततीति शेषः
वैणाल्वयः विस्मरणं वा उद्दीपितगुणस्मृतिजनितमूर्छनावशाद्वेत्यारसरत्नाकरे वियोगायोगयोरिष्टगुणा ४०
नाकीर्तनात्स्मृतेः सातत्यात्कारोद्यवा मूर्छा दशधा जायते तया मन्त्सादृश्यमित्यादिना मनःसंगानुवृत्तिः सूचिता ८२

92

तस्मैविरहिणीमायायागणलेत्वागानिसंभावयन्तिआलोकेइत्यादिभिस्त्रिभिः आलोकेति हेमेघसामत्प्रियावलिषुनित्येषु
शेषितागमनार्थंपुष्टदेवताराधनेषुव्याकुलाव्याकुलतावाविरहेणतनुकृशंभावगम्यंनकार्यस्मादृष्टचिरत्वात्संप्रति
संभावनयोत्प्रेक्षितमित्यर्थः मत्सादृश्यंमदाकारसाम्यंनतुप्रतिकृतिमित्यर्थः यद्यपिसादृश्यंनामप्रसिद्धवस्तुनेगग
नमाकारसाम्येनयापिप्रतिकृतित्वेनविवक्षितमिति इतरथालेख्यत्वासंभवात् अतएवकेशेआलोख्यपिचसादृश्य
मित्यभिधानात्लिखंतिकविरहलकारोविस्मयंतीवावाचित्रदर्शनस्यविरहीणांविनोदोपायत्वादितिभावः पतत्र
कामशरपत्रसंवादेनसम्यग्विवेचितमस्माभीरघुवंशसंजीविन्यांसादृश्यप्रतिकृतिदर्शनैःप्रियायाइत्यत्रमधुरवचनां

आलोकेतेनिपततिपुरासावलिव्याकुलावा मत्सादृश्यंविरहतनुवाभावगम्यंलिखंती पृच्छंती
वामधुरवचनांसारिकांपंजरस्थां कच्चिद्भर्तुः स्मरसिरसिकेत्वंहितस्यप्रियेति ८८ ॥

मंजुभाषिणीमतएवपंजरस्थांद्विस्रेभ्यःकृतसंरक्षणामित्यर्थः सारिकांस्त्रीपक्षिविशेषांहेरसिकेभर्तुःस्वामिनः
स्मरसिकच्चित्स्मरसिकिंकच्चित्कामप्रवेदनइत्यमरः भर्तारंस्मरसिकिमित्यर्थः अधीगर्थदयेशांकर्मणीतिष
ष्ठीसाचशेषाधिकाराच्छेषत्वविवक्षायामेवकर्मत्वविवक्षायांतुद्वितीयैवभवतीतिवेदितव्यंस्मरणकारणमा
ह हियस्मात्कारणात्त्वंतस्यभर्तुःप्रीणातीतिप्रियाइगुपधाज्ञाप्रीकिरःकःइतिकप्रत्ययः अतःप्रेमास्पदत्वा
त्स्मर्तव्यमर्हसीतिभावःइत्येवपृच्छंतीवाशब्दोविकल्पेउपमायांविकल्पेवेत्यमरः तेववालोकेदृष्टिपथेपुरानिप
ततिसद्यःपतिष्यतीत्यर्थः स्यात्प्रबंधेपुरातनेनिकटागामिकेपुरेत्यमरः यावत्पुरानिपातयोर्लडितिलट् ८९

मे॰टी॰
५८

सव्यापारामिति कालापकं दे सो विप्रहरनि दिवसे सव्यापारां पूर्वोक्तबलिविरचेलखनादिव्यापारवतीं ते सखीं स्वप्रिया
विप्रयोगो विरहस्तथा तेन प्रकारेण प्रकारे गुणवचनेभ्यस्तियालितियाल प्रत्ययः न पीडयेत् यथा रात्राविति शेषः
किंतु रात्रौ निर्विनोदां निर्व्यापारां ते सखीं गुरुतरशुचं गुरुतरा शुक् यस्यास्तां गुरुतरशुचं चेत्यतिडभेदः शंके तर्कयामि शंका
भयवितर्कयोरिति शाश्वतः अतो निशीथे अर्द्धरात्रे उन्निद्रामुन्नष्टनिद्राम् अवनिरेव शयनं शय्या यस्यास्तां नियमा

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः शंके रात्रौ गुरु
तरशुचं निर्विनोदां सखीं ते मत्संदेशैः सुखयितुमलं पश्य
साध्वीं निशीथे तामुन्निद्रामवनिशयनां सौधवातायनस्थः
९४ ॥

त्स्थंडिलशायिनीं साध्वीं पतिव्रतां सती साध्वी पतिव्रतेत्यमरः अतो नास्या शंकितव्यमिति भावः त्वं तां त्वत्स
खीं मत्संदेशैर्मद्वार्ताभिः अलं पर्याप्तं सुखयितुमानंदयितुं सौधवातायनस्थः सौधगवाक्षगतः सन् पश्य सव्या
पारा च पितरोमिवर्ष्महृत्तनस्तुकादयः सुखयंती एकयन सखीव्यापारैर्वियोगिनीमिति रात्रावकरे हृतनस्तायमेव ५८
इति भावः अनेन जागरावस्थोक्ता ९४ ॥

शेषानिति अथवा विरहस्य दिवसस्तस्मात्स्थापितस्य तत आरभ्य निश्चितस्यावधेरंतस्य शेषान् गतावशिष्टान् मा
सान् देहलीदत्तपुष्पैः द्वारशाखाधारदारु गृहावग्रहणी देहल्यंगणमित्यमरः तत्र दत्तानि राशित्वेन निहितानि
यानि पुष्पाणि तैर्गणनया एकोद्वा विंशति संख्यानेन भुवि भूतले विन्यस्यंती वा पुष्पविन्यासैर्मासान् गणयंती।
त्येवेत्यर्थः यद्वा हृदयेनिहितो मनसि संकल्पितः आरंभ उपक्रमो यस्य तत् अथवा हृदयेनिहिता आरंभास्तुवना।

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा वि
न्यसंती भुवि गणनया देहलीदत्तपुष्पैः संभो।
गंवा हृदयनिहितारंभमास्वादयंती प्रायेणैते
रमणविरहेष्वंगनानांविनोदाः ९३ ॥

लिंगनादयो व्यापारा यस्मिन्तं संभोगं रतिमास्वादयंती अनुभवंती वा आलोकेनेति पततीति पूर्वेण संबंधः न
नु कथमयं निश्चय इत्याशंक्यार्थांतरन्यासेन परिहरति प्रायेणेत्यादिना अंगनानां रमणविरहेष्वेते पूर्वोक्ताः वि।
नोदाः कालयापनोपायाः एतेन संकल्पावस्थोक्ता तदुक्तं संकल्पो नाम विषयमनोरथ उदाहृत इति ९३ ॥

मे·टी·
५५

पादानिति जालमार्गप्रविष्टान्गवाक्षविवरगतान् अमृतशिशिरानिंदोः पादान्रश्मीन्पूर्वप्रीत्या पूर्वस्नेहेन पूर्व। ९६
स्नेहेन पूर्ववदानंदकारा भविष्यंतीति बुद्ध्येति भावः अभिमुखं यथा गतं तथैव संनिवृत्तं तदा तेषामतीवदुःसह
त्वादिति भावः चक्षुर्दृष्टिं खेदात्सलिलगुरुभिरश्रुडर्भैः पक्ष्मभिश्छादयंतीं अतएव साभ्रेऽह्नि दुर्दिने न प्रबुद्धा

पादानिंदोरमृतशिशिरान्जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव । खे
दाच्चक्षुः सलिलगुरुभिः पक्ष्मभिश्छादयंतीं सा
भ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्तां २८ ।

मेघावरणाद्विकसितां न स्वापान्मुकुलितां उभयत्रापि नञर्थेन शब्दस्य स्वपेति समसः स्थलेकम। ५५
लिनीमिव स्थितां एतेन विषयद्वेषात्षष्ठी दशा सूचिता २८ ॥

पुनस्तामेवविशिनष्टि आधिक्षामामितिचतुर्भिः आधीति आधिर्नाममनोव्यथातयाक्षामांकृशांदुःखाधिर्मानसीव्यथे।
त्यमरः क्षायतेःकर्त्तरिक्तः क्षायोमइतिनिष्ठातकारस्यमकारः विरहेशयनेविरहशयनेतस्मिन्विरहशयनेपा।
ल्लवादिरचितशयनेइत्यर्थः सन्निषण्णमेकंपार्श्वंयस्यास्तांप्राच्याः पूर्वस्याः दिशोमूलेउदयाद्रिप्रान्तेइत्यर्थः प्रा
चीग्रहणेनक्षीणावस्थाद्योतनार्थंमूलग्रहणंदृशत्वार्थंकलामात्रेकलेवशेषोयस्यास्तांहिमांशोस्तनुंमूर्त्तिमिव।

आधिक्षामांविरहशयनेसन्निषण्णैकपार्श्वां प्राचीमूलेतनुमिव
कलामात्रशेषांहिमांशोः नीतारात्रिःक्षणमिवमयासार्द्धमिच्छा
रतैर्या तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्ती ९५ ॥

स्थितांपुनः किंविशिष्टां यारात्रिर्मयासार्द्धंइच्छयाकृतानिरतानीच्छारतानितैः शाकपार्थिवादित्वान्मध्यमपदलो।
पीसमासः क्षणइवनीतायापितातज्ञानीयामेवरात्रिंविरहेणमहतीमहत्वेनप्रतीयमानामसतीमुष्णैरश्रुभि
र्यापयन्तीयातेर्णिजन्तात्शत्रन्तप्रत्ययः अर्त्तिह्रीत्यादिनापुगागमः सएवकालः सुखिनामल्पः प्रतीयतेदुःखिना।
नविपरीतइतिभावः एतेनकार्श्यावस्थोक्ता ९५ ॥

आद्य इति आद्ये विरहदिवसे दाम शिरोमाल्यादि हित्वा त्यक्त्वा या शिखा बद्धा ग्रथिता शापस्यान्ते विगलितशुचा वी-
तशोकेन मयोद्वेष्टनीया मोचनीया तां स्पर्शक्लिष्टां स्पर्शे सति मृदुलकेशेषु सव्यथामित्यर्थः कठिना च सा विष-
मा च कठिनविषमा तां खञ्जकुब्जादिवदन्यतरस्य प्राधान्यविवक्षया विशेषणविशेष्येन बहुलमिति समासः

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीया
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ९८

पकवेणीमेकीभूतवेणीं पूर्वकालेत्यादिना तत्पुरुषः तथाभूतां शिखां अयमिताः अकर्तितोपान्ताः न-
खाः यस्य तेन करेण गण्डाभोगात् कपोलविस्तारात् असकृन्मुहुर्मुहुः सारयन्तीं अपसारयन्तीं तापशेषे- ५
ति पूर्वेणासंबंधः असकृत्सारणाद्धितविभ्रमदशा सूचिता ९८ ॥

निश्वासेति शुद्धस्नानात्तैलादिरहितस्नानात् परुषं कठिनस्पर्शं नूनं आगंडलंबं स्वप्नयेति समासः अलकं चूर्ण
कुंतलान् जातावेकवचनं अधरकिशलयं क्लिश्यति क्लिश्नातीति वा तयोक्तेनोक्तेनेत्यर्थः क्लिश्यतेऽर्पितादाता।
क्लेशयतीति निश्वासेन विक्षिपंती चालयंती पुनः कीदृशीं स्वप्नजोऽपि स्वप्नावस्थाजन्योऽपि सातात्संभोगः संभ

निश्वासेनाधरकिशलयं क्लेशिना विक्षिपंती
शुद्धस्नानात्परुषमलकं नूनमागंडलंबं मत्सं
भोगः कथमुपनयेत्स्वप्नजोऽपीति निद्रामाकां
क्षंतीं नयनसलिलोत्पीडरुद्धावकाशां ९० ॥

वादिति भावः मत्संभोगः कथं केन प्रकारेणोपनयेदागच्छेत् अन्याशयेनेति शेषः इति नेवोक्तार्थत्वादप्रयोग।
योनकस्मादित्याशंकानिरासः प्रार्थनायां लिङ् नयनसलिलोत्पीडेनाश्रुप्रवाहेण रुद्धावकाशामाक्रांतस्थानां दुर्ल।
भामित्यर्थः निद्रामाकांक्षंतीं स्वप्ने[illegible]दिति भावः अत्रास्रविसर्जनेन लज्जात्यागो व्यज्यते ९० ॥

मे॰टी॰
५८

तन्वीं दृशीं दृशामापन्नेति कथं त्वया निश्चितमत आह ज्ञाने इति श्लोकेन हे मेघ तव सख्यास्तामनो मयि संभृतस्नेहं
संचितानुरागं जाने अस्मात् स्नेहज्ञानकारणात् अहं प्रथमविरहे प्रथमग्रहणाड् अत्यातिशयेनातनार्थं तां त्वत्सखी
मित्थंभूतां पूर्वोक्तावस्थापन्नां तर्कयामि न तु सुभगंमानितया कामिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्र
करणं तत्राह वाचालमिति सुभगमात्मानं मन्यते इति सुभगंमन्यः आत्ममाने खश्चेति खशप्रत्ययः अरुर्द्विष
दित्यादिना मुमागमः तस्य भावः सुभगंमन्यभावः सुभगमानित्वं मां वाचालं बहुभाषिणं न करोति खलु मेघ
यो भिमानितेन प्रकटयामीत्यर्थः स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् इत्यमरः आलजाटचौ बहुभाषिणि

ज्ञाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा दित्थंभूतां प्रथमविरहे तामहं तर्कयामि वाचा
लं मां न खलु सुभगंमन्यभावः करोति प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ५०
रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासं ॥

इति लच्प्रत्ययः किं तु हे भ्रातः यन्मयोक्तं तत्सर्वं विलम्बाथितामामिमां दिवसेनान्तरेण ते चिरादेव प्रत्य
क्षं भविष्यतीति शेषः ५० रुद्धेति श्लोकैः रुद्धापाङ्गयोः नेत्रप्रान्तयोः प्रसरः प्रस्थानं यया तामञ्जनेन स्नेहः स्ने
हस्तेन शून्यमपि च मधुनो मद्यस्य प्रत्यादेशात् प्रतिनिषेधात् विस्मृतो भ्रूविलासो येन तत्तथोक्तं त्वया सन्निकर्षे स
ति स्वकम्पालवातो शास्त्रिनीति शेषः उपरिस्पन्दे भागे स्पन्दने स्फुरतीति उपरिस्पन्दितं तथा च निमित्तनिदाने स्पन्दात्
ह्निन्दलाभं ललाटे पर्यन्तं स्पन्दे भ्रुवि इष्टविप्राप्तिर्दृशो रुद्धापाङ्गे दानि माद्दिशेतिमृगाक्ष्याः नयनं वाममिति शेषः ५९

सेति प्रबलाद्दुर्बलां संन्यस्ताभरणां कृशतनुमसिक्ताभरणां असकृदनेकशो दुःखदुःखेन दुःखप्रकारेण प्रकारेगुणा।
वचनेस्मिति द्विर्भावः शय्योत्संगे निहिते पेशले मृदुले गात्रं शरीरं धारयंती वहंती अनेनात्यंताशक्त्या मूर्छावस्था सूच्य
ते सा त्वत्सावीत्वामपि नवजलमयं नवांबुरूपं अस्रं बाष्पमवश्यं सर्वथा मोचयिष्यति द्विकर्मसु पचादीनां चोपसंख्या
नमिष्यत इति सूत्रः पचादित्वाद्विकर्मकत्वं तयाहि प्रायः प्रायेणार्द्रांतरात्मा मृदुहृदयो मित्रस्त्वं वातः शरीरः सर्वः क
रुणामयी वृत्तिं रतक्करुणावृत्तिर्यस्य सकारुणार्द्रवृत्तिर्भवति द्वियस्मादस्मिन्नवसरे सर्वथा त्वया शीघ्रं गंतव्यमंतरेश
हृपदस्य परिहारायेति संदर्भोभिप्रायः ननु किमिदमादिमां चतुः पीतिमुपेत्यावस्थांतराण्येवं भवानकविराहतवा

सा संन्यस्ताभरणमबला पेशलं धारयंती शय्योत्संगे निहितमसकृद्दुःखदुःखेन गात्रं त्वामप्य
स्रं नवजलमयं मोचयिष्यत्यवश्यं प्रायः सर्वो भवति करुणावृत्तिरार्द्रांतरात्मा ९९ ॥

न उच्यते संयोगो विप्रलंभश्च द्विधा शृंगार उच्यते पूर्वानुरागमानाख्यप्रवासकरुणात्मना विप्रलंभश्चतुर्था त्र प्रवास
स्तु च विधा कार्यतः संभ्रमाच्छापादस्मिन्काव्ये तु शापतः प्रागसंगतयोः पूर्वोरिति निपूर्वानुरंजने चत्वः पीतातयो
रवस्थाः दशाप्युक्ततिना पुनः इच्छनः सेगासकल्पनागिराकृशतारतिः ह्रीत्यागोन्मादमूर्छनाइत्यनंगदशादशपू
र्वसंगतयो रेव प्रवास इति कारणात्तु नतत्र पूर्वं चत्वः पीतिह्रस्यतुमदैति हृत्संगमस्यतत्सिद्धस्याप्यविच्छेदोत्र वापितेषु
सामान्य एवं बहूनि तिलावहावस्थितिः वैपर्यादादिसादित्वावैश्यादेतिमांतयाहृत्संगादीनिदाचवृकाविरशाविविस्थि
तेमन्साहृदयेलीवेनीतिपदेस्मिन प्रोतपादिता चत्वः पीतिरिति पाकेनिरुतरकृन्माननतत चत्वः पीतिर्भवेत्खिन्नेः।

त्रागिए ह्लतुकिंभर्तृपस्पाभिनास्पात्किवैरोपिकथानवास्प्रवासा
द्रागतेस्मास्मिन्नित्पलेकल्लेदैईष्या ९९ ॥

स्वरश्च वारदर्शीनातयथामालविकाद्यपविनमित्रस्य पशुपतिः शो
षितानोत्वभर्तृणांकारश्चश्चसर्वेनाप्रयतेनापि सेटेहंस्वकल

मे·टी·
५२

तस्मिन्निति हे जलद तस्मिन्काले त्वदुपसर्पणकाले सा मत्प्रिया लब्धं निद्रासुखं यया सा लब्धनिद्रासुखा स्याद्य
दि स्याच्चेत् एनां लब्धनिद्रां प्रियामन्वास्य पश्चादासित्वेत्यर्थः उपसर्गवशात्सकर्मकत्वम् स्तनितविमुखो गर्जितपरा
ङ्मुखो निःशब्दः सन् अन्यथा तन्निद्राभंगादिति भावः याममात्रं प्रहरमात्रं द्वौ यामप्रहरौ समौ इत्यमरः सहस्व प्र
तीक्षस्व प्रार्थनायां लोट् शक्तयोरेकवाक्यतया स्वरतस्य यामावधिकत्वात्क्षेपितथा भवितव्यमित्यभिप्रायः तथा च
रतिसर्वस्वे एकवारावधिर्यामो रतस्य परमो मतः चंडशक्तिमतोः स्त्रीनोः द्वन्द्वक्रमवर्तिनोरिति यामसहनस्य।

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्यादन्वास्यैनां स्त
नितविमुखो याममात्रं सहस्व मा भूदस्याः प्रणयिनि मयि स्वप्न
लब्धे कथंचित् सद्यः कंठच्युतभुजलताग्रंथिगाढोपगूढं
९३ ॥

प्रयोजनमाह माभूदिति अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथंचित्कृच्छ्रेण स्वप्ने लब्धे सति गाढोप
गूढं गाढालिंगनं नपुंसके भावे क्तः कंठाच्च्युतः स्रस्तो भुजलतयोर्ग्रंथिर्बंधो यस्य तत्तन्माभून्मा स्म कथंचिल्लब्धा
लिंगनस्य सद्यो विघातो माभूदित्यर्थः नचात्र निद्रोक्तिः नाम्नुविद्रामिति पूर्वोक्तेन विरुध्यते समनमाद्यवस्थानु
पातिकनिद्रासंभवात्तथा रत्नाकरे अशाकीरोदने निद्रा निर्लज्जानर्थं वा भ्रमः सममादिभुजायेतदशा।

९३ ॥ मेघ ५२ दूतटीका

103

वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः। दाने देवादिपूजायां स्पंदेऽलंकरणेपि चेति स्त्रीणां वामभागप्रशस्त्यात्।
मीनक्षोभान्मीनचलनाच्चलस्य कुवलयस्य श्रिया शोभया तुलां सादृश्यमेष्यतीति शंके तर्कयामि तुल्यार्थैस्तुलो
पमाभ्यां तृतीयान्यतरस्यामित्यत्र सदृशपर्यायस्य तुलाशब्दस्य प्रतिषेधात् अत्र च सादृश्यवाचित्वात्तद्योगेपि
तृतीया ९१ वामश्चेति मदीयैः कररुहपदैः नखपदैः पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः मु
च्यमानः परित्यज्यमानः नखाकरादिनखक्षतार्थः ऊरोर्नखोपदंतक्षतमिति स्वेकंठवंशकुचपार्श्वभुजोरः श्रोणि
सक्थिषु सुखोस्यन्दमाङ्गहीति चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसारमयं कटिभूषणं दैवगत्या दैव

त्वय्यासन्ने नयनमुपरिस्पंदि शंके मृगाक्ष्या मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ९२
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयैर्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या। संभो
गान्ते मम समुचितो हस्तसंवाहनानां। यास्यत्यूरुः सरसकदलीस्तंभगौरश्चलत्वं ९२ ॥

वशेन त्याजितः संप्रति नखक्षताभावेन शीतोपचारादिकृतस्यैव पर्यादिति भावः पाने ... कामविक्रः हिक
मेसुपवादीनां चोपसंख्यानमिष्य इति हिक ... संभोगान्ते मम हस्तसंवाहनानां हस्तेन मर्दनानां संवाहनं म
र्दनं स्यादित्यमरः समुचितः परिचितः सरसोऽक्षभावः परिपक्वोन्मसुष्कश्च विवलितः तत्रैव पाण्डिमसंभवात्स चा
सौ कदलीस्तंभश्च स इव गौरः पाण्डुः गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि चेति मालतीमालायामस्याः प्रियायाः
वाम ऊरुः चलत्वं स्पंदनं यास्यति प्राप्स्यति ऊरोः स्पंदात् रतिविद्या दक्षिणोत्थिता वामस्य इति निमित्तनिदाने ९२

मे॰टी॰ संप्रतिहतस्यश्रोतृजनाभिमुखीकरणाचान्तरीयमुपदिशति भर्तुरिति विधवागतभर्तृकानभवतीत्यविध
५३ वेसभर्तृकेअनेनभर्तृजीवनसूचनात्निशागतशंकांनिरस्यति मांतवपत्युःप्रियमित्रंप्रियसुहृदंतत्रापिहृद 104
यनिहितैर्मनसिस्थापितैः तत्संदेशैस्तस्यभर्तुः संदेशैः त्वत्समीपमागतंभर्तृसंदेशकथनार्थमागतमित्यर्थः
अंबुवाहंमेघंविद्धिजानीहिनकेवलमंबुवाहोऽहं किंतद्घटकोपीत्याशयेनाह योंबुवाहोऽबलानांस्त्रीणां

भर्तुर्मित्रंप्रियमविधवेविद्धिमामंबुवाहं त
त्संदेशैर्हृदयनिहितैरागतंत्वत्समीपं योवृं
दानित्वरयतिपथिश्राम्यतांप्रोषितानां मं
द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि
९५

वेणयस्तासांमोक्षेमोचनेउत्सुकानिपथिश्राम्यतांश्रांतिमापन्नानांप्रोषितानांप्रवासीनांपांथानामित्यर्थः
मंद्रैःगंभीरैःस्निग्धैर्मधुरैर्ध्वनिभिर्गर्जनैःवृंदानिसार्थानत्वरयतियोयोपकारिणोमेकिमुवक्तव्यमस्ति। ५३
दमुपकारित्वमितिभावः ९५ ॥

तामिति तां प्रियां स्वस्य जलकणिकाभिर्जलबिंदुभिः शीतलेनानिलेनोत्थाप्य प्रबोध्य एतेन तस्याः प्रसुप्तत्वमुक्त
नानिलसमाधिर्भज्येतेयर्याद्भोजराजः मृदुभिः मृदुलैः पाटैः शीतैः व्यजनकैस्तनोश्रुतौ च मधुरैर्गीतैर्निद्रातो
बोधयेत्प्रभुमिति प्रभिनवैर्मालतीनां जालकैः समं जातीकुसुमैः सह सुमना मालती जातिः साकसाईसमस
हृतारको जालकं क्लीबे कलिका कोरकः पुमानिति चामरः प्रत्याश्वस्तां शिशिरानिलसंपर्कात्तु नरुज्जीवितां स्व
स्थः कर्तरि क्तः प्रादित स्थतिचकारादिट्प्रतिषेधः एतेनास्याकृष्टमसौकुमार्यं गम्यते त्वत्सनाथे त्वत्सहिते।

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सम
मभिनवैर्जालकैर्मालतीनां विद्युद्गर्भस्तिमितनयनां त्वत्सना।
थे गवाक्षे वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ९५ ॥

सनाथे प्रभुमध्याङ्कसहिते वितनापि नीति शब्दार्णवे गवाक्षे स्तिमितनयनां कोऽसाविति विस्मयान्निश्चलने
त्रां मानिनीं जलान्नो विन्यासदृष्टिमित्यर्थः विद्युद्गर्भितः स्वापरस्य विद्युद्गर्भः अन्तर्लीनविद्युत्क इत्यर्थः गर्भो
ऽपवरके तस्य गर्भो भ्रूणे अक्षा एवं भेके इति शब्दार्णवे दृष्टिप्रतिघातेन वक्तुर्मुखावलोकनप्रतिबंधकत्वात्तु वि
द्युताविद्योतितत्वमिति भावः धीरो दृष्ट्वा समन्त्रमयास्वलनादिनेनटनाश्यासन प्रसंगादिति भावः स्तनितान्ये
व वचनानि तैर्वक्तुं प्रक्रमेथाः उपक्रमस्व विध्यर्थे लिङ् प्रोपाभ्यामित्यात्मनेपदं ९५ ॥

मे॰टी॰
५५

संप्रतिसंदिशति तामिति हे आयुष्मन् प्रशंसायंमत्वप् परोपकारस्माच्चजीवितेऽस्यर्थः ममवचनेऽप्यर्थनावचनं।
तस्मादात्मनःस्वस्यउपकर्तृंचपरोपकारेणात्मानंकृतार्थयितुंचेत्यर्थः उपकारक्रियाप्रतिकर्मत्वेपितस्यानुका
रोस्यादिवत्संबंधमात्रविवक्षायामात्मनइतिषष्ठीनविरुध्यतेयथाहभारविःसालक्ष्मीरुपकुरुतेययापरेषामिति
तथाश्रीहर्षश्चसाभूनाम्नुपकर्तुंलक्ष्मीःदृष्टेविदासागंतुंनकुलदलकस्यमनश्चारिंतेवामदात्मनोश्चानुमितितः।

तामायुष्मन्ममचववचनादात्मनश्चोपकर्तुं ब्रूयाएवंतवसहचरोरा
मगिर्याश्रमस्थ श्रव्यापन्नःकुशलमबलेपृच्छतित्वांवि।
युक्तः पूर्वाभाष्यंसुलभविपदंप्राणिनामेतदेवः ९२ ॥

याचकश्चितद्वितीयादर्शनात्सर्वत्रतदेवेतिनायमाख्यानमसहचनमेवत्वांप्रियामेवंब्रूयाःकिमितिहेअबव
लेतवसहचरोभर्तारामगिरेश्चित्रकूटस्याश्रमेषुतिष्ठतीति रामगिर्याश्रमस्थःसन्नव्यापन्नोनमृतःवियो।
गदुःखिपवंविधःसन्नत्वांकुशलंपृच्छतिडुत्याविद्यादिष्टत्वेनद्विकर्मकत्वंतथादिसुलभविपदां आपन्नसि।
द्धविपत्तीनांप्राणिनामेतदेवकुशलमेवपूर्वाभाष्यंप्रथमंमवश्यंकथनीयंकुतश्चास्यावश्यकार्यत्वाप्र ५५

भर्तृर्मम्यारिशत्तापनस्य फलमाह इतीति इत्येवमाख्याते पवनतनये मैथिलीमीतेव सा मत्प्रिया उन्मुखी उत्कंठेनो
त्सवेन उच्छ्वसितहृदया विकासितचित्ता च सती त्वां वीक्ष्य तद्धृत्तांतं संभाव्य सत्कृत्य अस्मात्परं मैत्रीज्ञापनात्परं स।
र्वं श्रोतव्यम्प्रवहिता अप्रमत्ता सती श्रोष्यति च अत्र सीता हनुमदुपसंख्यानादस्याः पातिव्रत्यं मेघस्य हनुमत्साम्यं संपति
स्वव्यपेतेन हनुमतः स्वरूपाकारेत्व ब्रह्मचारी बली धीरो मायावी मानवर्जितः धीमान्दारोरीतिः शंकोवक्राहृतः स्त्रियाम।

इत्याख्याते पवनतनये मैथिली वोन्मुखी सा
तामुत्कंठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवं
श्रोष्यत्यस्मात्परमवहिता सोम्य सीमंतिनीनां
कांतोदंतः सुहृदुपनतः संगमात्किंचिदूनः

९९ ॥

वेदिति ननु वार्तामात्रश्रवणादस्याः को लाभ इत्याशंक्यार्थांतरं न्यस्यति सोम्य साधो सीमंतिनीनां वधूनां नारी सीमं
तिनी वधूरित्यमरः सुहृदा सुहृन्मुखेनोपनतः प्राप्तः सुहृत्प्रदे विप्रलंभशंकानिरासार्थं कांतस्योदंतो वार्ता कांतोदं
तः वार्ता प्रवृत्तिरुदंतो नतउदंतः स्यादित्यमरः संगमात्कांतसंपर्कात्किंचिदूनः ईषदूनः तद्वदेवानंदकारीत्यर्थः ९९

मे॰टी॰ संप्रति स्वावस्थानिवेदनाय प्रक्रमते शब्दाख्येयमिति हे अबले यस्ते प्रियः सखीनां पुरस्तात् दूरेग्राननस्पर्शलवन्मा
५५ खिसयर्के लोभात् गदेनात शब्दाख्येयं शब्देन रवेणाख्येयं उच्चैर्वाच्यमपि यन्न हृद्वचनमपीति शेषः कर्णे कथयितुं 108
लोलो लालसः भूत् किल लोलुपो लोलभौल्लोलो लालसो लपठोपि चेति यादवः श्रवणविषयं कर्णपथमतीतः

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्
सोतिक्रांतः श्रवणविषयं लोचनाभ्यामदृष्टस्
त्वामुत्कंठाविरचितपदं मन्मुखेनेदमाह ९९

क्रांतः तथा लोचनाभ्यामदृष्टः अतिदूरस्थत्वात् द्रष्टुं श्रोतुं च न शक्य इति भावः स ते प्रियः त्वामुत्कंठया वि
रचितानि पदानि यस्मिन् तत् शब्दाख्यानि वाक्यानि च यस्मात् तयोः कं पदं शब्दे च वाक्ये चेति विश्वः इदं वक्ष्यमाणं श्यामा ५५
स्वंगमित्यादिकं मन्मुखेनाह मम यथा तेन मत्प्रवक्तृतर इत्यर्थः ९९ ॥

अंगेनेति किंच दूरवर्ती दूरस्थः नचागंतुंशक्नुतःस्यात् वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा सन्
संचरः तेनुना कृशेन गाढतप्तेन अत्यन्ततप्तेन सास्रेण साश्रुणा उत्कंठा वेदनास्य संजाता उत्कंठितेन तेनोत्कंठितेन तत
दस्य संजातमित्यादिना इतच् प्रत्ययः उत्कंठे च कर्तरि क्तः समधिकतरोच्छ्वासिना दीर्घनिश्वासेनेत्यर्थः ताच्छी
ल्ये णिनिः अंगेन स्वशरीरेण तनु कृशं तप्तं संततमश्रुमुहूर्तेन ग्रसमाक्लिन्नं स्वस्थुरस्वस्य पहिंगोरोदनेवधु।

अंगेनांगं सततनुतनुना गाढतप्तेन तप्तं सा
स्रेणाश्रुद्रवमविरतोत्कंठमुत्कंठितेन दी
र्घोच्छ्वाससमधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ९८

संश्लेषेत्यर्थः श्लेषः अविरतोत्कंठमविच्छिन्नवेदनं उच्छ्वासं तीव्रनिश्वासं तिग्मेऽत्रोतीदां खरं चेड स्वसंसमं।
स्वतमिति द्रलायुपः अंगान्वदीयैतैः स्वयंवेद्यैः संकल्पैर्मनोरथैः विशत्येकीभवतीत्यर्थः अत्र साद्यागात्व।
द्योतनार्थेनाथकेन नायकायाः स्वसमानावस्थान्वयुक्त ९८ ॥

मे॰टी॰
५८

धारेति देवालेधाराभिःआसिक्तस्यस्थलस्यसुरभिवत्सुरभिणःअस्यत्वन्मुखस्यदूरीभूतंप्रतनुमपिमांपंच।
बाणःक्षिणोतिअतोऽस्मिन्घर्मांतेवर्षाकालेवासराणिकथंव्रजेयुः इतित्वमेवविगणयविचारयकथंभूता। 110
निवासराणिदिक्षुसंसक्ताःसक्तेप्रविरलघनाहैःव्यस्तःखंडितःसूर्यातपोयेषुतानि ॥११॥ सप्रतिप्रतिकृतिद
र्शनमाह त्वामिति हेप्रियेप्रणयेनप्रेमातिशयेनकुपितांकुपितावस्थायुक्तांत्वांप्रतिकृतिमित्यर्थः धातु।

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्यबाले दूरीभूतंप्रत
नुमपिमांपंचबाणःक्षिणोति घर्मांतेस्मिन्विगणयकथंवा।
सराणिव्रजेयुः दिक्संसिक्तप्रविरलघनव्यस्तसूर्यातपानि
॥१२॥

वेगेरकादयःधातवस्तानाहिगाह्वादिगैरिकादि त्वमालिखितियावत् तएवरागारंजकद्रव्याणि वि
त्रादिरंजकद्रव्यलाक्षादौप्रसिद्धयोः पुनरस्यचरागःस्यादारुण्येरंजनेपुमानितिशाश्वताणवैतैः
धातुरागैःशिलायांशिलापट्टेआलिख्यनिर्मायआत्मानंमांमन्युतिकृत्यमि
त्यर्थः तेनवचित्रगतायात्वमित्यर्थः ॥

सदृशप्रतिकृतिस्वप्नदर्शनतदंगस्पृष्टवस्तुस्पर्शनाख्यानि चत्वारि विरहिणां विनोदस्थानानि तथा चोक्तं गुणाख्यापना।
कायां वियोगे वा प्रियजनसदृशानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि तदंगस्पृष्टानामुपगतवतां दर्शन
मपि प्रतीकारोऽनंगव्यथितमनसां कोपि गदितः इति तत्र सदृशवस्तुदर्शमाह श्यामास्विति श्यामासु प्रियंगुलतासु।
श्यामा तु महिलाह्वया लता गोविन्दिनी गुन्द्रा प्रियंगुः फलिनीत्यमरः अंगं शरीरमुत्पश्यामि सौकुमार्यादिसाम्यादंग।
मिति तर्कयामीत्यर्थः तथा चकितहरिणीनां प्रेक्षणे दृष्टिपातं शशिनि चंद्रे वक्त्रच्छायां मुखकान्तिं तथा शिखिनां व
र्हिणां वर्हभारेषु पिच्छसमूहेषु केशान् प्रतनुषु स्वल्पासु नदीवीचिषु भ्रूवीचीनां विशेषणोपादानेपि तानुक्तय

श्यामास्वंगं चकितहरिणीप्रेक्षणे दृष्टिपातं वक्त्रच्छायां शशिनि शिखिनां वर्हभारेषु केशान् उत्प
श्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान् हंतैकस्थं क्वचिदपि न ते तन्वि सादृश्यमस्ति ९८ ॥

एणग्रहदोषः भ्रूसाम्यनिर्वाहाय महत्त्वदोषनिराकरणार्थत्वात्स्फीतितदुक्तं रसरत्नाकरे भ्रूलतादेर्गुणोत्कर्षभा
वोत्कर्षभावोक्तो दोषवायोगो विशेषणादिदोषस्तनाहृयुक्तगुणाग्रहणादिति विशेषणेन गुणाग्रहणात् भ्रूविका
शात् भ्रूपताका इति पाठे भ्रुवः पताका इवेत्युपमितसमासः उत्पश्यामीति सर्वत्र संबध्यते तन्व्यापिनातिशयमनो
निह्नुतिविस्पाशयेनाह हंतेति हंत विषादे हंत हर्षेऽनुकंपायां वाक्यारंभविषादयोरित्यमरः हे चंडि कोपने चंडः
त्वंतस्तकोपनेऽत्यमरः गौरादित्वात् ङीष् एकत्र उपमानकथनमात्रेणानकोपितव्यमिति भावः क्वचिदप्येकस्मिन्नपि।

वस्तुविति हन्तीति तत्तयोक्तं तेन त्वत्सादृश्यं नास्ति अतो न ह्रणामीत्यर्थः । व
तेनास्याः सौंदर्यमनुपममिति व्यज्यते ९९ ॥

मे॰टी॰ अधुनास्वप्नदर्शनमाह मामिति स्वप्नस्यविज्ञानेस्वप्नःस्वप्नंस्वप्नस्यविज्ञानमितिकोशात्संदर्शनंसंवित्दर्शनं
५८ स्वप्नयेशाह्वहृद्ष्टौस्वप्नेऽतिसंविदीतिशब्दार्णवेस्वप्नइतिसंदर्शनानिस्वप्नप्रज्ञानानिच्छत्रहलादिवत्सामान्यविशे
षभावेनसद्प्रयोगः तेषुमयाकथमपिमहताप्रयत्नेनलब्धायाःगृहीतायाःइष्टायाइतियावत् तेनचनिर्दया
श्लेषोगाढालिंगनंसएवहेतुः तस्यनिर्दयाश्लेषार्थमित्यर्थः षष्ठीहेतुप्रयोगइतिषष्ठीआकाशेनिर्विषयेप्र

मामाकाशप्रणिहितभुजंनिर्दयाश्लेषहेतो र्लब्धायास्तेकथमपिम
यास्वप्नसंदर्शनेषु पश्यन्तीनांनखलुबहुशोनस्थलीदेव
तानां मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाःपतन्ति १.२३ ॥

णिहितभुजंप्रसारितबाहुंमांपश्यन्तीनांसाक्षात्कुर्वतीनांस्थलीदेवतानांमुक्तामौक्तिकानीवस्थूलाश्रुलेशा
बाष्पबिंदवःतरुकिशलयेषुअनेनचैलाञ्चलेनाश्रुधाराणांसमाधिर्ध्वन्यतेबहुशोनपतन्तीति नकिंतुपतन्त्येवे
त्यर्थः निश्चयेनखलुशब्दप्रयोगः तथाचालंकारसूत्रंस्मृतिनिश्चयसिद्धार्थेषुनञ्खलुशब्दप्रयोगः इतिमत्सत्वगुरु
देवतानामश्रुपातःद्वितीयविदेशगमेगोमहाडःस्वमरणंचभवेत्ध्रुवमितिहितैर्देवताश्रुपतननिषेधदर्शनात्

पत्र ५८ स्वप्नसमागमस्वप्नार्थेतरुकिसलयपतिताश्रुर्णि १.२३ ॥ 112

चरणपतितंकर्तुंतयालिखितुंयावदिच्छामितावदेवरुद्धासमकालमेवमुहुरुपचितैः प्रवृद्धैः अस्रैरश्रुभिः कर्तृभिः स्व
स्वमश्रुणिशोणितइतिविश्वः मेदृष्टिरालुप्यते आच्छाद्यतइत्यर्थः ततोदृष्टिप्रतिबंधाल्लेखनप्रतिबध्यतेतिभावः किं
बहुनाकृतांतोघातकः नृशंसोघातकः क्रूरस्त्वमरः कृतांतोयमसिद्धांतदैवाकुशलकर्मस्वित्यमरः तस्मिन्नपिचित्रे।

त्वामालिख्यप्रणयकुपितांधातुरागैःशिलाया
मात्मानंतेचरणपतितंयावदिच्छामिकर्तुं अस्रैस्
तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमे क्रूरस्तस्मि
न्नपिनसहतेसंगमंनौकृतांतः १०२ ॥

पिनौआवयोः युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थितयोर्वांनावादेशः संगमंसहवासंनसहते आलेख्यसंग
तिमप्यावयोरसहमानंदैवंसाक्षात्संगतिंनसहतेइतिकिमुवक्तव्यमित्यपिशब्दार्थः १०२ ॥

मे॰ टी॰ संक्षिप्येतइति दीर्घायामाःप्रहराःयस्यांसादीर्घयामाविरहेवेदनयातयापिप्रतीयमानेत्यर्थः त्रियामारात्रिःआ 114
५८ द्यंतयोरर्द्धयोर्दिनव्यवदानात्त्रियामाइतिहेरमामीकथंकेनप्रकारेणसंक्षिप्येतेलघुक्रियेतेअहरपिसर्वावस्था
सुसर्वकालेष्वित्यर्थः मंदमंदोमंदप्रकारः प्रकारेगुणवचनस्येतिद्विरुक्तिः कर्मधारयवदुत्तरेष्विति कर्म

संक्षिप्येतेक्षणमिवकथंदीर्घयामात्रियामाः सर्वा
वस्थास्वहरपिकथंमंदमंदातपंस्यात् इत्थंचेतश्च
टुलनयनेदुर्लभप्रार्थनंमे गाढोष्माभिःकृतमश
रणंत्वद्वियोगव्यथाभिः ११५ ॥

धारयवद्भावात्स्वपोलकमंदमंदातपंसंतापंकथंस्यात्तस्मादेवहेचटुलनयनेचंचलाक्षिइत्थमनेनप्रका
रेणदुर्लभप्रार्थनमप्राप्यमनोरथंमेममचेतोगाढोष्माभिरतितीव्राभिस्त्वद्वियोगव्य ५९
थाभिरशरणमनाथंकृतं ११५ ॥

इदानींतदंगस्पर्शएवमत्स्पर्शनमाह भित्वेति देवदारुद्रुमाणांकिशलयपुटान्पल्लवपुटान्सद्योभित्वातत्क्षीरस्रु
तिसुरभयस्तेषांदेवदारुद्रुमाणांक्षीरस्रुतिभिःक्षीरनिष्यंदैःसुरभयःसुगंधयःतुषाराद्रिवातात्वेलिंगमिदंयेवा
तादक्षिणेनदक्षिणमार्गेणतृतीयाविधानेप्रकृत्यादिभ्यउपसंख्यानात्तृतीयासमेनधावतीतिवत् तत्रापिप
थःकरणत्वस्यप्रतीयमानत्वात्कर्तृकरणयोस्तृतीयेतिभाष्यकारःप्रवृत्ताश्चलिताःहेगुणवतिसौम्य

भित्वासद्यःकिशलयपुटान्देवदारुद्रुमाणां येतत्क्षीर
स्रुतिसुरभयोदक्षिणेनप्रवृत्ताः आलिंग्यंतेगुणवतिम
यातेतुषाराद्रिवाताः पूर्वंस्पृष्टंयदिकिलभवेदंगमेभिस्त
वेति १२५

सौम्यमार्यादिगुणसंपन्नेतेतुषाराद्रिवाताः पू र्वमेषाकमभिःवातैःतवांगंस्पृष्टंभवेद्यदिकिलेति
संभावितमेतदितिबुद्ध्येत्यर्थः वार्तासंभाव्ययोःकिलेत्यमरः मयाआलिंग्यंतेआश्लिष्यंतेअत्रवायूनांस्पर्शनत्वा
पिमूर्त्तत्वेनालिंगनायोगादालिंगयतइत्यभिधानेपत्स्योन्मत्तप्रलपितमित्यदोषइतिवदन्तिरुक्मकाराःस्व
यमेवोन्मत्तप्रलापीत्युपलालनीयः १२६ ॥

मे॰टी॰ नचनिरवधिकमेतद्दुःखमित्याह शापांतइति शार्ङ्गःपाणौ उत्थितेयस्यतस्मिन्शार्ङ्गःपाणौसमप्रसुपमानेत्यादि।
५४ नाबहुव्रीहिःप्रहरणार्थेभ्यःपरेनिष्ठासप्तम्यौभवतइतिवक्तव्यात्पाणिशब्दस्यात्रनिपातःभुजगःशेषएवशय
नंतस्मातउत्थितेसतिमेशापांतःशापावसानंशेषात्चतुरोमासानेमेघदर्शनप्रभृतिहरिबोधनांतमित्यर्थः
दशाहादिवसाधिकंतत्रविवलितमित्युक्तमेवलोचनेमीलयित्वाचक्षुषीनिमील्यगमयधैर्येणातिवाहयेत्यर्थः
पश्चादनंतरंत्वंचाहंचावांत्यदादीनिसर्वैर्नित्यमित्येकशेषःत्यदादीनांमिथोद्वंद्वेयत्परंतच्छिष्यतइत्यस्मच्छेषः।

शापांतोमेभुजगशयनादुत्थितेशार्ङ्गपाणौ शेषान्मासान्गमयचतुरोलोचनेमीलयित्वा प
श्चादावांविरहगुणितंतंतमात्माभिलाषं निर्वेक्ष्यावःपरिणतशरच्चंद्रिकासुक्षपासु १०७ ॥

षः विरहेगुणितंमेवंकरिष्यामीतिमनस्यावर्तितंतमितिवीप्सायांद्विरुक्तिः आत्मनोरावयोरभिलाषंमनोरथंप
रिणताशरच्चंद्रिकायासांतासुक्षपासुरात्रिषुनिर्वेक्ष्यावःभोक्ष्यावहेविशतेर्लृट्निर्वेशोभृतिभोगयोरित्यमरः अ
त्रकेचिन्नभोनभस्ययोरेववार्षिकत्वात्कथमाषाढादिचतुष्टयस्यवार्षिकत्वमुक्तमितिचोदयित्वातत्पदाश्रयं।
त्वात्पर्यंदशारितत्सर्वमसंगतंप्रत्रागतशेषाचत्वारोमासाइत्युक्तेकविनानतेनेवार्षिकाइतितस्मादत्रकोपालंभतेः ५५
परिणतशरच्चंद्रिकासित्युक्तेननतेदेवशयनाडुभावुत्कृष्टस्यविरोधएवेति १०७ ॥

नचमदीयदुर्दशाश्रवणादुद्वेजितव्यमित्याह नन्विति एकवाक्यंतुशाह्नोभेदकः किंतुनभेदकइत्यर्थः अथवानन्विति।
पाठः नन्वितिआमंत्रणेअप्यवधारणेतुनन्वनुनयामंत्रणेनविस्मरः नत्वमिषेबद्धः विगणयन्शापांतेसमेवे।
कदिष्यामीत्यावर्तयन्आत्मानमात्मनैवप्रकृत्यादिभ्यउपसंख्यानात्तृतीयाअवलंवेधारयामियथाकथंचिज्जीवा।
मीत्यर्थः तत्तस्मात्कारणात्हेकल्याणिसुभगेत्वत्तैभागेयनैवजीवामीतिभावः बह्वादिभ्यश्चेतिङीष् त्वमपिनि

नन्वात्मानंबहुविगणयन्नात्मनैवावलंबे तत्कल्याणित्वमपि
नितरांमागमःकातरत्वं कस्यात्यंतंसुखमुपगतंदुःखमेकांत
तोवा नीचैर्गच्छत्युपरिचदशाचक्रनेमिक्रमेण ११६ ॥

तरांमत्यंतंकातरत्वंभीरुत्वंमागमःमागच्छगमेर्माङिलुङ् माङ्योगादडागमाभावः तादृक्सुखिनोरावयोरी
दृशीदुःखितिकथंनविभेमीत्याशंक्याह कस्येतिकस्यजनस्यात्यंतनियतंसुखंउपनतंप्राप्तंएकांततोनियमेनदुः
खंवाउपनतंकिंतुदशाःअवस्थाःचक्रस्यरथांगस्यनेमिस्तदंतःचक्रंरथांगंतस्यांतेनेमिःस्त्रीस्यादित्यमरःप्रमानित्य
मः तस्याःक्रमेणपरिवर्तनक्रमःशकटोचपरिवर्तमितिविश्वः नीचैरधःउपरिचगच्छतिप्रवर्ततेजंतोःसुखदुःखेष

= ५५

मे॰टी॰
१०

एतस्मादिति एतस्मात्पूर्वश्लोकोक्तात् अभिज्ञायतेऽनेनेत्यभिज्ञानं लक्षणं तस्य दानात्प्रापणात् मां कुशलिनं क्षेम
वंतं विदित्वा ज्ञात्वा हे असितनयने कुले भवं कौलीनं तस्मात् कौलीनाल्लोकापवादात् एतावता कालेन परासुर्नो चे
न्न सा गच्छेदिति जनप्रवादादित्यर्थः मयि विषये अविश्वासिनी अमा शंकिनी मा भूः मा भव भवतेर्लुङ् माङ्योगाद
डागमप्रतिषेधः न च दीर्घकालविप्रकर्षात्पूर्वस्नेहनिवृत्तिशंका कार्येत्याह स्नेहानिति किमपि किंवा निमित्तं
न विद्म इति शेषः स्नेहान्प्रीतीः विरहे समागमयोर्विप्रकर्षे सति ध्वंसिनो विनश्वरानाहुः न तथा न भवतीत्यभिप्रा

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा मा कौलीनादसितनयने मय्यविश्वासिनी भूः स्ने
हानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवंति ११९ ॥

यः किं तु ते स्नेहा अभोगाद्विरहे भोगाभावाद्धेतोः प्रसक्तप्रतिषेधेपि नञ्समासः इष्टे वस्तुनि विषये उपचितो र
सः स्वादुर्येषु ते उपचितरसाः संतः विवृद्धतृष्णा इत्यर्थः रसो रागोऽयं रसः स्वादेति कोशो विषयरागयोरिति विश्वः प्रेमरा
शीभवंति वियोगासहिष्णुत्वदशामापद्यंत इत्यर्थः स्नेहप्रेमणोरवस्थाभेदाद्भेदः तदुक्तमालोकनाभिलाषो रा
गस्तद्द्योतनः प्रेमा रतिः शृंगारो योगे वियोगतो विप्रलंभश्चेति एतदेव स्फुटीकृतं रसरत्नाकरे प्रेमादिलक्षणप्रेषु
न ब्रूतात्वभिलाषकः रागस्तु तत्संगबुद्धिः स्यात् स्नेहस्तत्प्रवणक्रिया तद्वियोगासहः प्रेम रतिस्तत्संगवर्द्धनं शृंगारः।

118

[illegible] ११२९ ॥

मे प्रतितन्स्नामेन्नं वंचकत्वशंकानिरासायातिगूढमभिधेयमुपदिशति भूय इति हे अचले भूयः पुनरप्याह त्वं नीमन्मोखेनेति शेषः मे नन्वंचनमेनत्किमिति पुरा शङ्किश्चिरातीते स्यात्पुरा वा विरातीते निकटागामिके इत्यमरः पु राइवैशयने केवलं लग्नापि त्वं गलेव दृढस्पर्शकयमनागमने संभवेदिति भावः निद्रां गत्वा किमपि केन वा निमित्तेन

भूयश्चाह त्वमपि शयने कंठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति
१·२८ ॥

सर्थः सस्वरं सशब्दं उच्चैरित्यर्थः रुदती सती विप्रबुद्धासीदिति शेषः प्रयासकृद्बहुशः पृच्छतो मे हे कितव त्वं कामपि रमयन मया स्वप्ने दृष्टः इति त्वया सान्तर्हासं मन्दहासं यथा तथा कथितं च इति ते भर्ता भूयश्चा हेति योजना ॥ १·२८ ॥

मे॰टी॰
९१

संप्रतिस्वापराधसमाधानपूर्वकंस्वकार्यस्यावश्यकरणंप्रार्थमानोमेघंविसृजति एतदिति हेजलदमेसौहार्दा।
त्स्नेहाद्वाहार्दादिवसिद्धेतेपूर्वपदस्यचेत्युभयपदवृद्धिः विधुरोवियुक्त इतिहेतोः विधुरंप्रत्यवायेस्यात्कष्टविश्ले
षयोरपीतिविश्वः विधुरस्तुविप्रलब्धाभिप्रायादिरर्थः मयिविषयेऽनुक्रोशबुद्ध्याकरुणाबुद्ध्यावाआत्मनस्तवा
नुचितमननुरूपमपिप्रियमेतन्मेदेशहरणंप्रार्थनात्कृत्वाप्रावृषावर्षाभिः स्त्रियांप्रावृट्स्त्रियांभूम्निवर्षाइत्यम

एतत्कृत्वाप्रियमनुचितंप्रार्थनादात्मनोमे सौहार्दाद्वाविधुरइतिवा।
मय्यनुक्रोशबुद्ध्या इष्टान्देशान्विचरजलदप्रावृषा।
संभृतश्री र्माभूदेवंक्षणमपिचतेविद्युताविप्रयोगः १२२ ॥

रः संभृतश्रीरुपचितशोभः सन्इष्टानभिलाषितान्देशान्विचरदेशेषुविचरेत्यर्थः देशकालाध्वगंतव्या
कर्मसंज्ञास्यकर्मणामितिवचनात्सकर्मकत्वंएवमहत्त्वक्षणमपिस्वल्पकालमपितेतवविद्युताकलत्रेणेति
शेषः विप्रयोगोवियोगोमाभून्मास्तुमाङिलुङित्याशिषिलुङ् अत्रेकाव्यसमाप्तित्वात्कुर्यादाशिषमंतमास
वेत्यामयेविद्वान्नायकेच्छानुरूपिणीमितिसारस्वतालंकारदर्शनात्काव्यान्तेनायकेच्छानुरूपोयमाशीर्वादः

॥ १२२ ॥

२ त्यस्य कुशलं संदिश्य तत्कुशलसंदेशानयनमिदानीं याचते आश्वास्येति प्रथमविरहोदग्रशोकां तीव्रदुःखां तेस
खीं मेवं पूर्वोक्तरीत्या आश्वास्य मोदयित्वा त्रिनयनस्य त्र्यम्बकस्य वृषेण वृषभेणोत्खाता अवदारिताः कूटाः शिखराणि य
स्य तस्मात्कूटोऽस्त्री शिखरं शृङ्गमित्यमरः शैलात्कैलासादाशु निवृत्तः प्रत्यावृत्तः सन् साभिज्ञानैः सलक्षणैर्यथा त
या प्रहितं प्रेषितं कुशलं येषु तैस्तस्याः तत्सख्याः वचोभिर्ममापि प्रातः कुन्दप्रसवप्रभातकुन्दकुसुममिव शिथि
लं दुर्बलं मम जीवितमपि धारयेथाः स्थापय प्रार्थनायां लिङ् ९१ संप्रति मेघस्य प्रार्थनांगीकारं प्रश्नपूर्वकं शङ्क

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः सा
भिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ९२
कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि निः
शब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ९३

ति कच्चिदिति हे सौम्य साधो इदं मे बन्धुकृत्यं बन्धुकार्यं देवटनस्य गुरुकुशलमिति वक्ष्यमाणः त्वया व्यवसितं
कच्चित्करिष्यामीति निश्चितं किं कच्चित्कामप्रवेदने इत्यमरः अभिप्रायज्ञापने कामप्रवेदने चेति न च तेन तूष्णींभा
वादनंगीकारः शंक्यस्तस्य प्रत्यावचित इत्यत आह प्रत्यादेशात् करिष्यामीति प्रतिवचनात् उक्तिराभाषणं वाक्यमादे
शो वचनं वचः इति शाश्वतः भवतो धीरतां गांभीर्यं न कल्पयामि न समर्थये खलु तर्हि कथमंगीकारज्ञानं तत्राह य
तो याचितः सन् निःशब्दोऽपि निर्गर्जितोऽपि प्रतिज्ञातोऽपि त्वमपि चातकेभ्यो जलं प्रदिशसि ददासि प्रत्युक्तं चेत दि

मे.टी. तस्मादेशाजलधरवचोदृश्यमेवाचचले प्राणांस्तस्याजनहितरतोरक्षितुंयत्तवध्याः प्राप्योदंतं स्वचरितमनास्मापि
८२ तस्यौस्वभर्तुः केषांतस्मादभिमतफलाप्रार्थनाप्रतमेघ ॥१२३॥ श्रुत्वावार्त्तांजलदकथितांतांधनेशोपि
सद्यः शापस्यांतंसदयहृदयःसंविधायास्तकोपः संयोज्यैतौविगलितशुचौदंपतीहृष्टचि
त्तौ भोगानिष्टानविरतसुखान्भोजयामासशश्वत् ॥१२४॥ इत्थंभूतंसुचरितपदे
मेघदूताभिधानं कामक्रीडाविरहितजनेविप्रयोगेविनोदं कामंचा
स्मिन्नतिनिपुणतामन्यभावःकवीनां नत्वार्यायास्चरणा
कमलंकालिदासश्चकार ॥१२५॥ इतिश्रीकालि
दासकृतौमेघदूताख्यकाव्यंसमाप्तम्
लिख्यतेरामजी संवत्
१९०८ ॥

122

130



८२

730

5





